रस तरङ्गिणी

भट्टदत्त

रसतरंगिनी; कलसनाथ, गणपति, भानुदत्त कृत; १८६२ वि० लि०
३८ पत्रक॥ ल० भ० १० पं० प्र० पू०

ह० ल०

749

36

Ras Tarangni complete:
by
Kavi Kailash Nath.

1862 Bikrami

ई.पु०

749



॥र॰त॰णी॰॥
॥१॥

ॐश्रीगणेशायनमः॥लक्ष्मींमौलौकलांलुब्धान्निगममुपहसंच्छोचयन्तंयज्ञजंतून्
लब्धंशोणाद्रिंपश्यन्समितिंदशमुखंवीक्ष्यरोमांचमंचन्॥हस्तौहैयंगवीनंचकि
तंमभिसरन्म्लेच्छरन्तौर्दिगंतान्सिंचन्दंतेनभूमिंतिलमिवतुलयन्यातु
वःपीतवासाः॥१॥भारत्याःशास्त्रकांतारश्रांतायाःशांतिकारिणी॥क्रियतेभानुना
भूरिरसारसतरंगिणी॥२॥वाणींकमलिनीभानोरेषारसतरंगिणी॥हंसांस्त
धियस्तत्रबुधंमत्रप्रतीयतां॥३॥गिरांदेवितरंगिण्यांवारयंकूरवारणान्॥यंद्रु
विष्यतिंलोकानांमांविलौविरलोरसः॥४॥हेतोःपूर्ववर्तित्वनियमादतःपूर्व
मेवतस्योपन्यासःसमुचितः॥रसस्यहेतवोभावादयस्तेनतेभ्यःपूर्वंभावादयए
वनिरूप्यंते॥रसानुकूलोविकारोभावः॥विकारोन्यथाभावः॥विकारश्चद्विविधः

॥राम॥
॥१॥

आंतरः शारीरश्च ॥ आंतरोपि द्विविधः ॥ स्थायिभावो व्यभिचारभावश्चेति ॥ शारीरस्तु सात्त्विक
दप: २ भावो ॥ यत्तु मनोविकारो भावस्तत्र देह विकारे स्वेदादौ भावपदप्रयोगो गौणः इति तन्न
तु स्वेदभयत्र भावपदप्रयोगेण विनिर्गंतुमशक्यत्वात् ॥ लक्षणानुरोधेन लक्ष
णाव्यवस्थितेः ॥ इतरभावस्यात्मभावत्वोपनायकत्वे सति सजातीयविजातीय
भावानभिभाव्यः प्रथमः ॥ परानभिभाव्यो मनोविकारो वा ॥ सकलप्रधानो मनो
विकार इति वा स्थायीभावः ॥ न च व्यभिचारिणि सात्त्विकभावे वा व्यभिचारः ॥ तास्ये
तरभावस्यात्मभावत्वोपनायकत्वाभावात् ॥ चरमसमयपर्यंतस्थायित्वादस्य
स्थायित्वव्यपदेशः ॥ स चाष्टधा ॥ तत्र भरतः ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भ
यं तथा ॥ जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥१॥ तत्र इष्टवस्तुसमीहा

॥र.त.णी.॥ जनितामनोविकृतिरपरिपूर्णारतिः ॥ साचक्वचिद्दर्शनेनक्वचिच्छ्रवणेनक्वचित्स्मर
॥२॥ णेन ॥ यथा ॥ चक्रवर्त्यस्यकृषीवलोनिगदितंपीयूषपाथोधरोभूःसंज्ञापरिचारिकासम
जनिस्फीतंस्मितंदोहदं ॥ संतापंतरणिःकर्कशरुचिंनिःश्वासवाताहतिंकस्मादे
षसहिष्यतेसखिवसंतश्रेमद्रुमःकोमलः ॥ १ ॥ कामपदादर्शनता ॥ कुतूहलकृतव त
चनवेषवैसादृश्यप्रकृतोमनोविकारःपरिपूर्णोहासः ॥ वचनभेदवैसादृश्यकृते २५
भयेक्रोधेवानातिव्याप्तिः ॥ तत्रकुतूहलकृतत्वाभावात् ॥ यथातातचरणानां ॥ श्रा
गच्छन्नगरोपकंठमिलितैरावेष्टितोबालकैःश्रुद्धोतेपरिचारिकाभिरविरसोल्ला
त समावेदितः ॥ साकूतंसकुतूहलंवलिवधूवृंदैःपुरोदापयत्सौन्नंकिंचिद्दंचितस्मि
तलवःपायात्सवोवामनः ॥ २ ॥ स्वपदादपरिपूर्णता ॥ इष्टविश्लेषजनितोरतिः ॥राम॥
॥२॥

श्र 3

नालिंगितोमनोविकारः परिसर्ग्गः शोकः॥ नचेष्टविश्लेषजनितविप्रलंभशृंगाररस-
स्यकरुणरसत्वापत्तिः॥ तस्यरत्यालिंगितत्वात्॥ नचरतिप्रीतिस्तयाविनाशोकोपि
नोत्पद्यते इतितथाचासंभवः इतिवाच्यं॥ इष्टसमीहाजनितमनोविकृतेरतेरक्त
त्वात्॥ कुमारसंभवेरत्याः॥ कादंबर्य्यांमहाश्वेतायाः॥ रघुकाव्येअजस्यप्रलापेक-
रुणएवरसः॥ तत्रतत्रबाधनिश्चयादिष्टवस्तुसमीहार्याभावात्॥ यत्रचमृतेजीवि
ताशातत्रशृंगारएवरसः॥ बाधसंदेहस्यग्राह्यसंदेहपर्य्यवसिततयासमीहायांअ
प्रतिबंधकत्वात्॥ तथाचयूनोरेकस्मिन्मृतेकरुणएवरसप्रलापः॥ जीवितयोर्वि-
श्लिष्टयोः प्रलापः शृंगारएवरसः॥ मृतएवरसरत्नप्रदीपिकायांकरुणोदाहरणं
प्रियेजीवितनाथजीवसीत्यभिधायोत्थितयोतयापुनः इति॥ ननुविप्रलंभशृंगार

॥ र. टी. ॥ सा पूर्वानुरागमानप्रवासकरुणात्मकत्वाज्जीवितोऽपि विप्रलंभस्य करुणरसत्वमागत

॥ २ ॥ मिति चेत्सत्यं करुणरसस्य तत्रांगत्वेन भासमानत्वात् करुणात्मकव्यपदेशः । यथा

विरहज्वरमूर्छयापतंतीनयनैर्नोऽश्रुजलेनसिच्यमानौ ॥ समवेक्ष्यरतिं विनिश्वसं

तीं करुणां कुड्मलितावभूवशंभोः ॥ ३ ॥ करुणांकुड्मलितैर्लद्दृग्गतौ ॥ अवज्ञादिकृतः

प्रमोदप्रतिकूलः परिमितो मनोविकारः क्रोधः ॥ प्रमोदप्रतिकूलविशेषणाद्दशमु

खापमानितस्य रामस्य वीररसे नातिव्याप्तिः ॥ यथा परशुरामस्य वाक्यं ॥ नोऽद्यारभ्य

करोमि कार्मुकलताविन्यस्तहस्तो भुजः किंचित्पाटलभासि लोचनयुगे तावन्निमेषं

दयान् ॥ यावत्सायककोटिपातितरिपुक्ष्मापालमौलिस्खलन्मज्जीमास्रपतत्प ॥ राम ॥

रागपटलैरामोदिनीमेदिनी ॥ ४ ॥ किंचित्पाटलत्वादर्दृग्गतौ ॥ शौर्यदानदयान्यतम ॥ २ ॥

कृतमनोविकारस्यपरिपूर्णउत्साहः॥ वीरस्तु युद्धवीरदानवीरदयावीरभेदात्त्रिधा॥ यु
द्धवीरस्योत्साहोयथा॥ सेनांसंघटनेघ्नतिंद्विगुणयन्नचापंचमत्कारयन्नेत्रसाभि
मुखोभविष्यतिजगद्विद्राविणोरावणः॥ इत्युत्साहविचारमूढहृदयोदेवोरघू
णांपतिर्ज्याविन्यासविधिंविनैवविशिखान्बाणासनेन्यस्यति॥ ५॥ अत्रविचा
रपदादप्रपूर्णता॥ दानवीरस्योत्साहोयथा॥ आदर्शोयशशोकमंडलमिदंहर्म्यो
यहेमाचलंदायायद्यमणीं महीमिवकथंनोभिद्यवेदत्तवान्॥ दित्सापल्लवितप्र
मोदसलिलव्याकीर्णनेत्रांबुजोजानीमोभृगुनंदनस्तदखिलंनत्रायशोदृष्टवान्
पल्लवितंनतुफलितमित्यपूर्णता॥ दयावीरस्योत्साहोयथा॥ दुस्तारसंसारपयो
धिपारप्रकारमालोकयतोजनानां॥ समुत्थितोवज्रासिकेटभारेः कृपांकुरःकौ

॥र.गी.॥ स्तुभकैतवेन ॥७॥ अंकुरोपन्यासादपरिपूर्णता ॥ अपराधकृतरवविकृतसत्वादिज
॥४॥ नितोपरिपूर्णो मनोविकारो भयं ॥ यथा ॥ तार्क्ष्यपत्रपवनोपसेवितं वीक्ष्य वीक्ष्य
दुनंदनं पुरः ॥ भीतभीतं इव तत्र कालियो मंदमंदमभिसर्त्तुमुद्यतः ॥८॥ इवोप
न्यासादपूर्णता ॥ अहृद्यदर्शनस्पर्शनस्मरणजनितमनोविकृतिरपरिपूर्णा
जुगुप्सा ॥ यथा ॥ शार्दूलशावकचटच्चटपाट्यमानसारंगशृंगवति भूभृति राम
चंद्रः ॥ वासं चकार न च भारत धांजुगुप्सां दुःखेषु दुःखमतिरेव न दुःखितानां
॥९॥ न तथेति पदार्दपूर्णता ॥ चमत्कारदर्शनस्पर्शनस्मरणजनितोपरिपूर्णोम
नोविकारो विस्मयः ॥ यथा ॥ युद्धं तमर्जुनं वीक्ष्य केवादेवाने विस्मिताः ॥ नमेनैव ॥राम॥
हुंगोविंदो हष्टकर्णपराक्रमः ॥१०॥ नमेनैव ह्मितिपदार्दपूर्णता ॥ शृंगारादो चम ॥४॥

त्कारदर्शनादयत्र मनोविक्षतिरंगतया भासते तत्र शृंगारादय एव रसाः ॥ प्राधान्येन यत्र
भासते तत्राद्भुतस्य वरसः ॥ अंगतया यथा ॥ वैषम्यं स्फुतिपंकजात्मकटयंत्यानं
दनीरं हृशोः स्वर्णालंकरणाञ्चनक्ति पुलको वैधर्म्यमंगश्रियः ॥ तस्यानूपरपाद्य
जि रागमंहसः ॥ पादारविंदश्रियो भेदं स्मितमेव वक्ति किमतः शिल्पं विधेर्वर्ण्यतां ॥ २१
प्राधान्येन यथा ॥ विनासायं कोयं समुदयति सौरभ्यसुभगः किरन् ज्योत्स्नाधारा
मधिधरिगि(?)सारापरिरढः ॥ धनुर्धत्ते स्मारं तिरयति विहारं न तमसां निरातं
कः पंकेरुहयुगलमंके नटयति ॥ २२ ॥ इति भानुदत्तविरचितायां रसतरंगिण्यां
स्थायीभावनिरूपणे नाम प्रथमस्तरंगः ॥ १ ॥ अथ विभावा निरूप्यंते विशेषेण
भावयंति उत्पादयंतीये रसान्ते विभावाः ॥ स च द्विविधः ॥ आलंबनविभावो द्दीप

॥र·त·॥
॥५॥

नविभावश्चेति॥ यमालंब्यरसः उत्पद्यतेसआलंबनविभावः॥ योरसमुद्दीपय
तिसउद्दीपनविभावः॥ तत्रालंबनविभावोयथा॥ प्राणस्यप्रतिमूर्त्तिः प्रत्यात्माउ
त्पलतिकायाः॥ अधिदैवतंनयनयोःसामसंध्यार्कांधिसौसैव॥ शृंगारस्योद्दीप
यथा नविभावो॥ तत्रभरतः॥ ऋतुमाल्यालंकारैःप्रियजनगांधर्वकाव्यसेवाभिः॥ उ
पवनगमनविहारैःशृंगाररसःसमुद्भवति॥ तत्रचेंद्रचंदनादउद्दहनीयाः य यथ
२ था॥ संध्याशोणांबरजवनिकांकामिनोःप्रेमनाट्यांनांदीभाग्भ्रमरविरुतैर्मारि
षः कोपिकालः॥ ताराःपुष्पांजलिमिवकिरन्सूचयन्पुष्पकेतोर्नाट्यारंभंप्रविशः
तिसुधादीधितिःसूत्रधारः॥ अथहास्यविभावाः॥ तत्रभरतः॥ विपरीतालंकारैर्वि ॥राम॥
कृताचाराभिधानवेषैश्च॥ विकृतैरर्थविशेषैर्हसतीतिरसःस्मृतोहासः॥ शृंगाबे ॥५॥

कृत्यादयऊहनीयाः॥यथा॥केयूरंघर्घरयान्तंभ्रमयान्मौलिंविवर्त्तयान्बाहुं॥नेत्रांचलं
चपलयन्नटयतिमायाशिशुःछायां॥करुणरसस्यविभावाः॥तत्रभरतः॥इष्ट
जनस्यविनाशाच्छापात्क्लेशाद्बंधनव्यसनात्॥एतैरर्थविशेषैःकरुणरसः
समुद्भवति॥बंधुदारिद्र्यादयऊहनीयाः॥यथा॥त्वंपश्यतोभुजगपाशनिबद्धदे
सै५ हमद्यापियदसूवोनवहिःप्रयांति॥नेत्रेनिमीलयसिपश्यसिनैवतावदास्यं
मदीयमितिलक्ष्मणयुक्तमेव॥रौद्रविभावाः॥तत्रभरतः॥शस्त्रायुधखड्गाभिनवा
हैःक्षतभेदांहिदारणाच्चैव॥संग्रामसंभवार्थादेभ्यःसंजायतेरौद्रः॥वैरिदर्शनाद
योनिर्भर्त्सनादयऊहनीयाः॥यथा॥लन्वंतीतिमिरघ्नतिंक्षतवतीप्रत्यर्थिवक्ष
व्यथामेषाभार्गवतावकीविजयतेनिस्त्रिंशधारानिशा॥द्रुद्रक्रुद्धविपक्षपक्षवि

॥र. त.॥
॥६॥

दत्तलुंभीद्रकुंभंस्थलभंस्यन्मौक्तिकैस्तवेनृपरितस्तारावलीवर्षति ॥ वीरस्यविभावाः
तत्रभरतः ॥ उत्साहाध्यवसायाहादविषादितादविस्मयान्मोहात् ॥ विविधादर्थविशेषा
द्वीररसोनामसंभवति ॥ विजयबलादयऊहनीयाः ॥ यथा ॥ लंकाधिपः संयतिशं
कनीयोजंगृहेभायहवाहुवीर्यैः ॥ इत्यालपंतंहनुमंतमेवरामः स्मितैरुत्तरयां
चकार ॥ दानवीरस्यविभावाः ॥ यथा ॥ वपुषाविनयेनवहंतिकेचिद्वचसाकेपिचरंति
चारुचर्यां ॥ अतिथौसमुपागतेसपर्यांपुलकैः पल्लवयंतिकेपिसंतः ॥ दयावीरस्य
विभावाः ॥ यथा ॥ कथममविरलजाग्रदिंद्रभाजोनिशायांतमसिद्दरवगाहेप्राणिनो
वीत्तगीयाः ॥ इतिकिमुसमुद्दंचद्दीपलेखाभिरामद्युतिमुरारिः कौस्तुभंसंबभार मुरारिः
ननुस्वनिष्ठः उत्साहः कथमुद्दीपनविभावोभवेदितिचेत्सत्यं ॥ उद्दीपनविभावोत्रा

॥राम॥
॥६॥

यमानगमकः सचत्वनिष्टः परनिष्ठोवेति न कश्चिद्विशेषः ॥ अनुभावस्तु स्वनिष्ठगम
कः तस्मादनुमापकत्वेन परत्वरतित्वनियमादिति ॥ ननु दयावीरः कथं करुणरसए
वनांतर्भवति ॥ निरवधिपरदुःखप्रहाणेच्छा दया सा च करुणया विना न संभवतीति
चेत् न करुणरसस्य स्थायिभावः शोकः ॥ दयावीरस्य स्थायिभाव उत्साह इति स्थायि
भेदेन भेदात् ॥ ननु दयावीरे करुणरसप्रतीतेः का गतिरिति चेत्सत्यं ॥ करुणया विना
दयावीरस्यानुद्भवादिति तत्र करुणाया अनुभावकत्वादिति ॥ भयानकस्य विभावाः
तत्र भरतः ॥ विकृतरवसत्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ॥ गुरुनृपयोरपरा
धात्कृतकश्च भयानको ज्ञेयः ॥ घाटिकावेधवेधनश्रवणश्मशानदर्शनादय ऊहनी
याः ॥ यथा ॥ उद्यत्कांतिकठोरकेसरदलत्वाथोदरप्रस्खलद्दिद्युद्दीधितिकोचनीकृत

॥र.त.॥
॥७॥

जगन्निःशेषभूमींधरः ॥ स्फूर्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजश्रेणीदाशीर्व
चनप्रहर्षितवलिर्व्यालोकि मायाहरिः ॥ बीभत्सस्य विभावाः ॥ तत्र भरतः ॥ अनभि
मतदर्शनेन च गंधरसस्पर्शशब्ददोषैश्च ॥ उद्वेजनैश्च बहुभिर्बीभत्सरसः समु
द्भवति ॥ अहृद्यवस्तूनां स्मरणश्रवणादय ऊहनीयाः ॥ यथा ॥ योधानां मंधरैरशो
कपुष्पैर्नेत्रैः सितैरंबुजैर्दंतैः कुंददलैः करैः सरसिजैः संपाद्य पुष्पांजलिं ॥ फिल्लं
वल्गीयुग्मं विधाय करिणां रक्तावसिक्तांगकैः प्रेतानां वटुभिः पुरः पुरभिदो नृत्यं
समारभ्यते ॥ अद्भुतविभावाः ॥ तत्र भरतः ॥ यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्म
रूपं च ॥ तत्सर्वमद्भुतरसे सोऽद्भुतो नाम संभवति ॥ मायेंद्रजालादय ऊहनीयाः ॥ यथा ॥
उद्दामोद्दाममर्त्यस्य तिभटदलद्दैत्यजाग्रत्स्वभावः सौर्यं देवो भवतु नरहरिस्ता

राम
७

रिताशेषलोकः ॥ यस्य प्रौढप्रतापोद्भटविकटसटाकोटिभिः पाटितानां मेघानां पंच
भोधराणां बहिर्हरिवनिरगुर्विद्युतां केतवेन ॥ इंद्रजालं यथा ॥ व्योम्नि प्रांगणसीम्नि
सांध्यकिरणैर्विस्तीर्णवेलांचलं ध्वांतैः कर्मणपांसुभिस्त्रिजगतां नेत्राणि संमोह
यन् ॥ ताराशौक्तिकमौक्तिकानि विहगश्रेणीरवच्छद्मना जीजीकृत्य बहिः करोति
दिनात्ययं चासुगोमायिकः ॥ इति भानुदत्तविरचितायां रसतरंगिण्यां विभावनिरू
पणं नाम द्वितीयस्तरंगः ॥ २ ॥ अथानुभावा निरूप्यंते ॥ ये रसान् अनुभावयंति
रसतां नयंति ते अनुभावाः कटाक्षादयः ॥ करणत्वेन अनुभावकता ॥ करणत्वं च
फलायोगव्यवच्छेदेन संबंधित्वं ॥ ननु रसे कथमनुभावकापेक्षेति चेत्सत्यं
स्थायिभावः परिपूर्णो रसः तस्य चांतरत्वात् ॥ ज्ञापकेन विना कथं ज्ञानमित्यनु
भावकस्यापेक्षणीयत्वात् ॥ ननु ॥ कटाक्षादयः कथमुद्दीपनविभावा न भवंति ॥

॥र. त.॥
८ ॥

जगन्ति: शेषभृं मीधरः॥ स्फूर्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजप्रौढाशीर्वे
चनप्रहर्षितवलिर्व्यालोकि मायाहरिः॥ बीभत्सस्य विभावाः॥ तत्र भरतः॥ अनभि
मतदर्शनेन च गंधरसस्पर्शशब्ददोषैश्च॥ उद्वेजनैश्च बहुभिर्बीभत्सरसः समु
द्भवति॥ अहृद्यवस्तूनां स्मरणश्रवणादय ऊहनीयाः॥ यथा॥ योधानां मधुरैरशो
कपुष्पैर्नेत्रैः सितैरंबुजैर्दंतैः कुंददलैः करैः सरसिजैः संपाद्य पुष्पांजलिं॥ छिन्नं।
वल्लीयुगं विधाय करिणां रक्तावसिक्तां गकैः प्रेतानां वटुभिः पुरः पुरभिदो नृत्यं
समारभ्यते॥ अद्भुतविभावाः॥ तत्र भरतः॥ यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्म
रूपं च॥ तत्सर्वमद्भुतरसे सोऽद्भुतो नाम संभवति॥ मायेंद्रजालादय ऊहनीयाः॥ यथा॥
उद्दामोद्दाममर्द्धवन्न तिभटदल द्दिग्गजाग्रस्वभावः सोऽयं देवो भव तु नरहरिस्ता राम

नो मुदेवो ८

रिताशेषलोकः ॥ यस्य प्रौढप्रतापोद्भटविकटसटाकोटिभिः पाटितानां मंत्राणामं
भोधराणां वहिर्हिरिव निरगुर्विद्युतां किं तवेन ॥ इंद्रजालं यथा ॥ व्योम्नि प्रांगणसीम्नि
सांध्यकिरणां विकीर्य विलोचलं ध्वांतैः कर्मणा पांसुभिस्त्रिजगतां नेत्राणि संमोह
यन् ॥ ताराशौक्तिकमौक्तिकानि विहगश्रेणीरवच्छय नाजीजीवत्सवहिः करोति व
दनात्संचाप्य गोमायिकेः ॥ इति भानुदत्तविरचितायां रसतरंगिण्यां विभावनिरू
पणे नाम द्वितीयस्तरंगः ॥२॥ अथानुभावा निरूप्यंते ॥ ये रसान् अनुभावयंति
रसतां नयंति ते अनुभावाः कटाक्षादयः ॥ करणत्वेन अनुभावकता ॥ करणत्वं च
फलायोगव्यवच्छेदेन संबंधित्वं ॥ ननु रसे कथमनुभावकापेक्षेति चेत्स्यात्सं
स्थायिभावः परिपूर्णो रसः तस्य चांतरत्वात् ॥ ज्ञापकेन विना कथं ज्ञानमित्यनु
भावकस्यापेक्षणीयत्वात् ॥ ननु कटाक्षादयः कथमुद्दीपनविभावा न भवंति ॥

॥र॰त॰॥
॥८॥

दृष्टे कटाक्षादौ कामिनो मनोविकारः परिपूर्णो भवति । अनुभवसिद्धमपनेतुमशक्य
त्वात् । किंच प्राचीनसंमतिरपि । ईषद्वक्रितपक्ष्मपंक्तिभिरनाकूतस्मितैर्वीक्षितै
रेतैरेव तवाद्य सुंदरि करक्रोडे जगद्वर्तते । अंतःपांसुलहेमकेतकदलद्रोणीदरा
दप्रियो दोर्मूलस्य विभावनादिह पुनः क्रूरे किमाक्रोशसि । १ । इत्यादय इति चेत्स
त्यं । कटाक्षादीनां करणत्वेनानुभावकत्वं विषयत्वेनोद्दीपनविभावा इति । स चानु
भावः कायिकमानसाहार्यसात्त्विकभेदात् चतुर्धा । कायका भुजक्षेपादयः मान
सा प्रमोदादयः । नायके चतुर्भुजत्वज्ञानादयश्चाहार्याः । सात्त्विका रोमांचादयः । शृंगा
रस्यानुभावाः । तत्र भरतः । नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदै
श्च । विविधैरंगविकारैस्तस्याभिनयः प्रयोक्तव्याः । कटाक्षभुजाक्षेपादयऊह
नीयाः । यथा । मुक्ताहारैः स्तनकलशयोः कर्णयोः कर्णिकारं मौलौ मालापरिभ

॥राम॥
॥८॥

१

वभयादेवदूरंन्यवारि ॥ दृष्टेभीष्टेसमजनिपुनः सुभ्रूवोभूषणाय प्रातर्वातप्रचलकमलश्रे
ह्रदसः कटाक्षः २ ॥ हास्यानुभावाः ॥ तत्रभरतः ॥ विकृताकारैर्वाक्यैरंगविकारैश्चविकृत
वेषैश्च ॥ हास्यंजनयेद्यस्मात्तस्मात् ज्ञेयोरसोहास्यः ॥ ओष्ठाधरविवर्णदर्शननासाक
पोलस्पंददृष्टिव्याकोषकुंचनादयउद्दनीयाः ॥ यथा ॥ पात्रीहृत्यकपालमंडलमिदं
पीयूषभानोःकलांवल्लीहृत्यफणामणिंफणिपतेःसंपाद्यतस्मिन्शिखां ॥ सायंदीप
विधिंवितन्वतिशिशौमंदंहसंत्यातयाकिंचित्कुंचदपांगभंगकुटिलादृष्टिःसमारो
पिता ३ ॥ करुणरसस्यानुभावाः ॥ तत्रभरतः ॥ निःश्वसितेनचरुदितेर्मोहप्रलाप
परिदेवनैश्च ॥ अभिनेयःकरुणरसोदेहाभिघातादिभिश्चैव ॥ मुखशोषप्रलापवैवर्ण्य
द्यउद्दनीयाः ॥ यथा ॥ तातेनिर्गच्छतिगणपतौनाकमद्यापितस्यावाचांदेव्यास्यज
ए०र तिनशिथिलेवंकंनैवदोष्मोः ॥ अद्याहीभवतिकुचयोर्नोपिपाटीरपंकोनेत्रेनिर्यत्स

न्या

॥र॰त॰॥
॥२॥

यस्मिन्पुनः कज्जलं स्थैर्यमेति ॥४॥ रौद्रानुभावास्तत्र भरतः ॥ नानाप्रहरणसंकुलशिर
सः कंपैः कराग्रनिष्पेषैः ॥ घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः ॥ भ्रुकुटीदंतोष्ठपी
डनादयश्चाऽहनीयाः ॥ यथा ॥ येयेभीमेनबद्धभ्रुकुटिघनरवं दंतनिष्पीडितोष्ठं विक्षिप्ता
वोत्क्षिविंध्याचलचटुलचमत्कारभाजः करींद्राः ॥ तेषांतेषां कपोलादिव भयविध
ताकाचिदुड्डीयलग्नाविंबं पीयूषभानोर्मधुकरपटलीलांछनस्यच्छलेन ॥५॥ वीर
रसस्यानुभावास्तत्र भरतः ॥ शौर्यैर्वीर्यैर्धैर्यैस्त्यागैरुत्साहपराक्रमप्रभावैश्च ॥ वाक्यैरा
क्षेपकृतैर्वीररसः सम्यगभिनेयः ॥ ननु प्रतींद्रियस्यास्य रसस्य ज्ञापकाः शरीरधर्माः
भवितुमर्हंति ॥ अत्र एव सर्वत्र उक्ताः तथाधैर्यौदार्यत्यागैश्चैवान शरीरधर्मो इति चेत्स
त्यं धैर्यपदेन वाचस्याभाव उक्तः ॥ उत्साहपदेनाश्रुपुलकादयो लक्षिताः ॥ यद्वा ॥ अ ॥राम॥
नुभावश्चतुर्विधस्तत्र मानसोऽप्यनुभाव उक्तः ॥ स च ज्ञायमान एव गमकः ॥ स च मानस ॥९॥

रोंद्रियकश्चेतिनविशेषः॥विनयबलादयःउहनीयाः॥युद्धवीरस्यानुभावोयथा॥श्र
ग्रेवासवजित्समग्रसमरव्यापारदीक्षागुरुःपार्श्वेतस्यविपक्षपक्षदमनक्रीडाधनो
रावणः॥इत्थंजल्पतिसर्वतःपरिजनेसंध्यास्मरतिंकुर्वतःश्रीरामस्यनकुंभकस्यव
पनेक्रमःसकोपिक्रमः॥६॥दयावीरानुभावोयथा॥ध्वांतस्तोमधरैर्जगद्भयकरैःपा
थोदरैर्वर्षतिक्रोडव्याकुलवत्सगोकुलदयादीनेक्षणःकेशवः॥हस्तन्यस्तमहीध
रच्युतिधियानैवांगुलीपल्लवैःस्वस्तंवेणुमुरीकरोतिननतानोःस्वस्तंवहस्त्यंशुकं॥७
दानवीरानुभावोयथा॥औदास्येनविधेहिगच्छनगृहान्संवीक्ष्यमृङ्गाजनंयाचेकिं
[illegible]वंतमेतदखिलंकौत्सक्षणंदाम्यतां॥दासश्चेदहमस्मिवेद्मिसुमनीसर्वैर्वसांग
हैतांस्वर्णचेङ्कुरुदक्षिणांधनपतेरानीयसंपाद्यते॥८॥भयानकस्यानुभावास्तत्र
भरतःकरचरणनेत्रमस्तकसर्वांगेषुप्रकंपनैश्च शुष्कौष्ठतालुकंठैर्भयानको

॥र.त॥
॥१०॥

नित्यमभिधेयः॥ रोमांचवदनवैवर्ण्यस्वरभेदादय ऊहनीयाः॥ यथा॥ व्यस्तस्रस्ततृणा
वलीढवदनव्याकीर्णफेनोच्चयं काकुव्याकुलघोरघर्घररवस्फारीभवल्लोचनं॥ कं
पप्रस्खलदंघ्रिवामनतनुश्वासोर्मिभिन्नाधरं विस्तीर्णे भुजगस्य वक्त्रकुहरे भ्र
स्यस्यागवः स्थिताः॥ ९॥ बीभत्सस्यानुभावस्तत्र भरतः॥ आनननेत्रविघूर्णनलो
ननासापुटाछादनेनैव॥ अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः॥ सर्वांगसं
हारं ष्ठीवनादय ऊहनीयाः॥ यथा॥ कपटहरेर्मुखकुहरे विस्तीर्णे वीक्ष्य दिनकरं
लक्ष्मीः॥ हतदैत्यपललकवलभ्रांतामुखमेश्चकं पिदधे॥ १०॥ अद्भुतानुभावास्तत्र
भरतः॥ परुषग्रहणोल्लासैर्हाहाकारैश्च साधुवादैश्च॥ वेपथुगद्गदवचनैः स्वर
भेदैरभिनयस्तस्य॥ निर्निमेषप्रेक्षणरोमांचादय ऊहनीयाः॥ यथा॥ पांडवं वी
क्ष्य दोर्दंडखंडितारातिमंडलं॥ अद्यापि नाकिनां नेत्रे निमेषा नैव जाग्रति॥ ११॥ इति

॥राम॥
॥१०॥

भानुदत्तविरचितायांरसतरंगिण्यांअनुभावनिरूपणोनामतृतीयस्तरंगः ३ अथसा
त्विकभावानिरूप्यंते तत्रभरतः स्तंभःस्वेदोथरोमांचस्वरभंगोथवेपथुः वैवर्ण्यमश्रु
प्रलयइत्यष्टौसात्विकामताः १ नन्वेषांसात्विकत्वंकथंव्यभिचारित्वंनकुतःसकल
रससाधारण्यादितिचेत् अत्रकेचित्सत्वंनामपरगतदुःखभावनायामत्यंतानुकू
लत्वंतेनसत्वेनधृताःसात्विकाःइतिव्यभिचारित्वमनाहत्यसात्विकत्वव्यपदेश
इतितन्न निर्वेदस्मृतिधृतिप्रभृतीनामपिसात्विकव्यपदेशापत्तेः नचपरगतदुः
खभावनायामष्टावेतेसमुत्पद्यंतइत्यनुकूलशब्दार्थः अतएवसात्विकमन्येषामि
तिवाच्यं निर्वेदादेरपिपरदुःखभावनायामुपपत्तेरिति अत्रेदंप्रतिभाति सत्व
शब्दस्यप्राणवाचकत्वात् अत्रसत्वंजीवशरीरंतस्यधर्माःसात्विकाः तथाचशारीरा
भावाःस्तंभादयःसात्विकाभावाइत्यभिधीयंते स्थायिनोव्यभिचारिणश्चभावाआंत

र॰त॰ ॥ ११ ॥

रतयानशरीरधर्मोइति ॥ शरीरधर्मत्वेसतिगतिनिरोधः स्तंभः नचनिद्रापस्मारादाव
तिव्याप्तिः शरीरधर्मपदेनतेषांव्यावर्त्तनात्प्रलयभावेतुचेष्टानिरोधोनतुगतिनि
रोधः अस्यविभावाः हर्षरागभयदुःखविषादविस्मयक्रोधाः ॥ यथा ॥ श्रोणीपीनतरात
नुःकृशतराभूमीधरात्पीवरावक्षोजस्पतटीकुतोनिजकुटीमातर्मयायाग्मता ॥ इत्युद्ध
व्याकदंबकुंजनिकटेनिर्विश्यमंदस्मितंगोविंदंसमुदीक्ष्यपद्मलदृशास्तंभस्तिरोधी
यते ॥ १ ॥ वपुषिमलिलोद्गमः स्वेदस्तस्यविभावाः मनस्तापहर्षलज्जाक्रोधभयश्रमपी
डाघातमूर्छा ॥ यथा ॥ कांतेतवकुचप्रांतेराजतेस्वेदबिंदवः ॥ हृष्यतामदनेनेवप्रहृताकु
सुमवृष्टयः ॥ २ ॥ विकारसमुत्थरोमोत्थानंरोमांचः अस्यविभावाः शीतालिंगनहर्षभय
क्रोधाः ॥ यथा ॥ वकुलमुकुलकोषेरोषनिर्यन्मधुकरकूजितभाजिकुंजभूमौ ॥ पुलक ॥ राम ॥
यतिकपोलपालिमालिस्मितसुभगः कथमद्यनंदसूनुः ॥ ३ ॥ गद्गदत्वप्रयोजकीभूत ॥ ११ ॥

स्वरस्वभावद्वैजात्यंस्वरभंगाः ॥ अस्यविभावाःक्रोधभयहर्षमदाः ॥ यथा ॥ व्यक्तिःस्यात्स्वरभे
दस्यकोपाद्व्लिंक्रियेतचेत् ॥ इतिपत्युःपुरोराधामौनमाधायतिष्ठति ॥ ४ ॥ भावत्वेसति
शरीरस्पंदोवेपथुः ॥ भावत्वेसतीतिविशेषणात्सूचकस्पंदादौनातिव्याप्तिः शरीर
पदंचेष्टाश्रयमात्रपरं तेनशरीरावयवकंपेनाव्याप्तिः ॥ अस्यविभावाः ॥ आश्लिंगन
हर्षभीत्यादयः ॥ यथा ॥ कथयकथमुरोजदामहेतोर्यदुपतिरेषचिनोतिचंपकानि
भवतिकरतलेयदस्यकंपः प्रियसखिमत्स्मृतिरेवमत्ससपत्नी ॥ ५ ॥ विकारप्रभव
प्रकृतवर्णान्यथाभावोवैवर्ण्यं ॥ अस्यविभावाः मोहभयक्रोधशीततापश्रमाः ॥ यथा
कुक्कुटेकुर्वतिध्वाणमाननंश्लिष्टयोस्तयोः ॥ दिवाकरकराक्रांतंशशिकांतिमिवा
दधौ ॥ ६ ॥ विकारजनितमक्षिसलिलमश्रु ॥ अस्यविभावाः ॥ हर्षामर्षधूमभयशोक
जृंभाशीतनिर्निमेषप्रेक्षणानि ॥ यथा ॥ विसृजविसृजवित्तदुःखधारामयमुपकंठ

र॰ त॰ मुपागतोमुकुंद:॥ इतिकथयतिमग्नविंदुरक्षोर्निपततिवक्षसिपक्ष्मलायतास्याः

१२ ७॥ शरीरत्वेसतिचेष्टानिरोधःप्रलयः॥ शारीरत्वेसतिइतिविशेषणात्निद्रादौना

तिव्याप्तिः स्तंभादयःशरीरधर्माः तेषांसाहचर्यकथनेनप्रलयोपिशरीरधर्मएव

तेनांगचेष्टायदेनशरीरचेष्टैवाभिमता॥ मनसस्तुकर्मनतुचेष्टा॥ अतएवचेष्टा

श्रयःशरीरमितिशास्त्रलक्षणं॥ यथा॥ नोवक्त्रंनमितंधृतंनचशिरोव्यावर्तितं

नोवपुर्वासोनन्यस्थमाहृतंनिगदितंनोवानिषेधाक्षरं॥ शोणंनापिविलोचनंवि

रचितंक्रीडाकलाकातरंचेतःकेवलमाननेमधुरिपोर्व्यापारितंराधया॥ ८॥ जृं

भाचनवमःसात्विकोभावइतिप्रतिभाति॥ उज्जृंभाननमुज्झसत्कुचयुगंस्विद्यत्कपो

लस्थलमित्यादौ शृंगारतिलकादौसात्विकभावसमानाधिकरण्यदर्शनात् नच राम

साभावानुभावइतिविपरीतमेवकिंनस्यात॥ सत्यनुभवत्वेभावत्वाविरोधात्॥ पुल १२

कादीनांतथात्वात् ॥ नचांगाकृष्टनेत्रमर्दनादीनामपिभावत्वापत्तिः ॥ तेषांभावलक्ष
णाभावात् ॥ रसानुकूलोविकारस्तितत्स्यलक्षणे ॥ अंगाकृष्टादयोनविकाराः ॥ किंतु
शरीरचेष्टाश्रत्यन्तासिद्धमेतत् ॥ अंगाकृष्टिरत्तिमर्दनंवापुरुषेरिच्छयाविधीयतेत्यज
तेच ॥ जृंभाचविकारादेवभवति ॥ तन्निवर्तनोचनिवर्ततेच ॥ यथा ॥ आधाय्यमानेरहसि
स्थितायाःसंभाव्यजृंभामचलात्मजायाः ॥ चूडूलतिंस्मेरमुखोमहेशःकरांगुलीभिःक
लयांचकार ॥ ९ ॥ इतिभानुदत्तविरचितायांरसतरंगिण्यांसात्विकभावनिरूपणं
नामचतुर्थस्तरंगः ॥ ४ ॥ अथव्यभिचारिभावानिरूप्यंते ॥ तत्रभरतः ॥ निर्वेदग्लानि
शंकाख्यास्तथासूयामदश्रमाः ॥ आलस्यंचैवदैन्यंचचिंतामोहःस्मृतिर्धृतिः ॥ २ ॥ व्रीडा
चपलताहर्षआवेगोजडतातथा ॥ गर्वोविषादऔत्सुक्यंनिद्रापस्मारएवच ॥ २ ॥ सुप्ति
र्विबोधोमर्षश्चाप्यवहित्थमथोग्रता ॥ मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच ॥ २ ॥ त्रास

॥र॰त॰॥ श्चैवविर्तकश्चविज्ञेयाव्यभिचारिणः॥ त्रयस्त्रिंशदमीभावाः प्रयांतिरसतामभी॥४॥ उत

॥१३॥ त्वतोरसेषुसंचारित्वंअनेकरसनिष्ठत्वं॥ अनेकरसव्याप्यत्वेवाव्यभिचारित्वं॥ नचरोमां

चादावतिव्याप्तिः॥ तेषामपिसंग्राह्यत्वात्॥ तेचभावाःशारीराव्यभिचारिणः॥ एतेचांतरा

व्यभिचारिणइत्यांतुविशेषः॥ ननुनिर्वेदादेःस्थायित्वंव्यभिचारित्वंचकथमितिचे

त्॥ रसपर्यंतस्थायित्वमितास्ततोगामित्वंचोपाधिभेदमादायोभयसंभवात्॥ स्वाव

मानेनिर्वेदः॥ संसारहेयत्वबुद्धिर्वा॥ तत्रविभावाः॥ तत्त्वज्ञानादयोजिहीर्षादयोनुभा

वाःस्वेदप्रकाशचिंताश्रुपातादयः॥ यथा॥ द्रोणीपर्यटनंश्रमायविदुषांवाद्रायवि

द्यार्जिताभानध्वंसनहेतवेपरिचितास्तेस्तेधराधीश्वराः॥ विश्लेषायसरोजसुंदरह

शांमास्येकृताहष्ट्यःकुज्ञानेनमयाप्रयागनगरेनाराधिनारायणः॥१॥ ग्लानिर्निर्वि ॥राम॥

लतानिःसहतावा॥ तत्रविभावाः रत्यायासतृट्क्षुधादयः॥ अनुभावाःनिर्व्यापारादयः ॥१३॥

न

यथा ॥ आहत्यैर्पुनरीतस्मार्यमगिरः कंदाद्धृहिः निःसृताशेषाश्लेषविधिं विधातुमपि वानैवोन्न
तारोऽभ्रंना ॥ ज्ञातस्तस्सम्यपास्याघातिहरीचंडास्तु चंडातपह्नि छष्णिद्धुरंगभंगुर
रचस्तस्याःस्थितार्हष्टयः ॥ २ ॥ उत्कटकोटिकानिष्टप्रतिसंधानेहष्टहानिविचारो वा शं
का ॥ तत्र दुर्न्नयपरक्रूरतादयो विभावाः ॥ अनुभावाः कंपक्रियाप्रच्छादनादयः ॥ यथा
गतेचिन्नविरोचनागुरुजनान्नि क्रूरग्रदोषाः खलाः घोराक्रूरवचः प्रपंचयशसि स्नस्रस्व
चतुस्रवाः ॥ किंस्यादिस्यमनर्थबीजमसकृत्से चिंत्यवन्तोरहे स्फूर्जात्किंशुकदामवा
मनयनानिःश्वस्यविन्यस्यति ॥ ३ ॥ परोत्कर्षासहिस्नुतापरनिष्टचिकीर्षा वाऽसू
या ॥ तत्र विभावाः ॥ मन्युदौर्जन्यादयः ॥ अनुभावाः कोपचेष्टादोषोद्भावनादयः ॥ यथा
हरशिरसि मयाप्यलब्धवासे निवसति का पिकलानुषारभानोः ॥ इति लिखिते
विधुंतुदस्य मूर्त्तिं प्रतिभवनं प्रतिभर्धरंभवानी ॥ ४ ॥ हर्षोत्कर्षो मदः ॥ दुःखासंभिन्न

14

र.त.
३९

सुखानुभवउत्कर्षः ॥ तत्रविभावाः पानंमनुभावः उत्तमानांनिद्रा ॥ मध्यमानांहसितं
अधमानांरोदनं ॥ इंद्रियसंमोहोनिद्रा ॥ तस्मादिंद्रियसंमोहननयनघूर्णनसाम्येन
निद्रैवनिद्रा ॥ नचहर्षेव्यभिचारिभावेतिव्याप्तिः ॥ तत्रहर्षमात्रसत्वत्वात् ॥ ननुतत्रो
त्कर्षोनिद्रोजातिविशेषः ॥ किंच ॥ तत्रमनोमोहः ॥ अत्रचमनःप्रसादइतिस्वरूपभे
दात् ॥ तत्रनिद्रारोदनादयोनुभावाः इत्यनुभवाभेदाच्च ॥ ननु ॥ तिष्ठतिष्ठद्राणंमूढ
मध्ययावत्पिबाम्यहं इत्यादौवीररसेपिमदोदृष्टोस्ति ॥ तत्रनिद्रारोदनेवाकथम
नुभावो ॥ नहिरोदितिनिद्रातिसंयतियोधवेतिचेन्न सत्यंरसभेदेनानुभावभेदः
शृंगारेतेअनुभावाः ॥ वीरेनयनारुण्यचमत्कारादयः सामान्येचमदेननयनघू
र्णनवचनस्खलनादयश्चेति ॥ यथा ॥ रसनारसयत्यसौमधुस्वयमस्माकमनर्थ
कंतनुः इतितत्रसमस्तमिंद्रियंप्रतिविंबमिषेणमज्जति ॥ ५ ॥ अथायासप्रभवः ॥

राम
३९

राभवः श्रमः। तत्र विभावाः रत्यध्वगत्यादयः। अनुभावाः स्वेदादयः। यथा। सरागमचेंद्रं स
हनिर्गतायाः स्वेदांबुसंसिक्तपयोधरायाः॥ अपांगपातैः शिथिलात्मजायाः श्रमान
शेषान्न शिथिलीचकार॥ ६॥ उत्थानाद्यक्षमत्वमालस्यं॥ विभावाः गर्भादयो॥ अनुभावाः
जृंभाकातर्यादयो॥ यथा॥ हरं हरं तं स्तनहारयष्टिं करेण रोद्धुं न शशाक तावत्॥ गिरेः सु
ता गर्भवती विहस्य हरं गं चलं कातरयांचकार॥ ७॥ दुःखावस्था दुःखातिरेको वा दैन्यं
अनौजस्यमिति केचित्॥ तन्न। तस्य बहिर्विषयत्वेन तदनुमापकत्वात्॥ विभावाः
विरहदारिद्र्यादयः॥ अनुभावाः भयक्लेशक्षुत्पिपासापीडादयः॥ यथा॥ तातचरणा
नां॥ प्रसेकं तत्तमालिकास्तनतटोत्संगे लवंगस्रजो माद्यन्मन्मथकुंजरेंद्रदशन
प्रांते विलग्नं मनः॥ किंचान्यद्विरहानलेन सरसं संदह्यमानं वपुर्गंडे पांडिमकेत
वेन सुतनोः फेनोच्चयं मुंचति॥ ८॥ चिंता ध्यानं॥ ध्यै चिंतायामित्यनुशासनात्॥ ध्या

15

॥ र॰त॰ ॥ नेंचनस्मरणान्मवं स्मृतिभावस्याग्रेहृथस्केननिरूपणात् किंतु चित्तैकाग्रता । इष्टानाष्टि
प्रभतयो विभावाः ॥ अनुभावास्तापवैवर्ण्यवाष्पश्वासादयः ॥ यथा ॥ शंभुं ध्यायसि शै
॥ २५ ॥ राम लेंतनये किं किं न जानीमहे ॥ तस्यैवासितनूनपादिव तनौ तापः समुन्मीलति ॥ अस्यो
रक्षमिषेणागच्छति बहिर्गंगातरंगावलिः पांडिम्नः कपटेन चंद्रकलिकाकांतिः समु
जृंभति ॥ ९ ॥ मोहो वैचित्त्यं ॥ मुह वैचित्ये ॥ धातोर्मोहनं मोह इति भावव्युत्पत्त्या मोह शब्दः
वैचित्त्यं कार्याकार्यपरिच्छेदः ॥ विभावा भीत्यावेगानुचिंतनादयः ॥ अनुभावाः स्तंभपात
मूर्छाघूर्णनादर्शनविस्मरणादयः ॥ यथा ॥ अंतःस्मेरसुवर्णकेतकदलद्रोणद्युतिं द्रो
हिणीलक्ष्मीवीक्ष्य समुद्यदिंदुवदनां क्षीरांबुधेरास्थितां ॥ शंभुः स्तंभशताकुलः शतमखः
कर्त्तव्यमूढेंद्रियः सोप्यज्ञातभुजंगपाशपतनो जातस्त्रिलोकीपतिः ॥ १० ॥ संस्कारजन्म ॥ राम ॥
ज्ञानं स्मृतिः ॥ संस्कारजन्यं ज्ञानं प्रत्यभिज्ञारूपं स्मरणरूपं च ॥ संस्कारजन्यत्वेनोभयसंग्र ॥ २५ ॥

२ हः अन्यथा प्रत्यभिज्ञाः पृथग्भावत्वापन्नैः संस्कारोद्बोधकसदृशा ॥ दृष्टिचिंतादयः विभा
समु वाः ॥ अनुभावाः भ्रून्नयनादयः ॥ प्रत्यभिज्ञा यथा ॥ कालिंदीसरसः समेत्य नभसः क्रो
डे परिक्रीडते चक्रद्वंद्वमिदं सुधाकरकलामाक्रम्य विस्फूर्जति ॥ चंद्रोपि स्मरचापचा
पल्लवमत्कारं समालंबते तस्मात्सैव कदंबकुंजकुहरे राधा परिभ्राम्यति ॥ २१ ॥ स्मृ
तिर्यथा ॥ वदनांबुजलग्न [illegible] दृष्टिपाते मयि वधूत्यवतंसमंसमूले ॥ दरकुंचित
रि दृष्टिराधिकायाः स्मितकिंमीतमाननं स्मरामि ॥ २२ ॥ धृतिः संतोषो दुःखेप्यदुःख
बुद्धिर्वा ॥ विभावाः ज्ञानशक्त्यादयो ॥ अनुभावाः अव्यग्रभोगादयो ॥ यथा ॥ भूषा भस्म र
जांसि वेश्म विपिनं वृद्धो वृषो वाहनं चैलं चर्म तथापि मन्मथरिपोर्भोगाः किमु भ्र
स्यति ॥ ईशत्वं किमु हीयते किमु महादेवेति नो गीयते किं वा तस्य च देवदेव इति वा।
संज्ञाजनैस्त्यज्यते ॥ २३ ॥ स्वच्छंदक्रियासंकोचो व्रीडा ॥ न च शंकात्रासे वातिव्याप्तिः तत्र

॥र.त.२६॥

क्रियाविरहणवनतुसंकोचः॥ विभावाः दुराचारादयो ऽनुभावाः शिरोनमननयननमुद्रण
प्रच्छादयः॥ यथा॥ अयोध्यावर्त्मने॥ भिन्नो भिन्नो प्रतिफलगतं भालसिंदूरबिंदुं दृष्ट्वा द
ष्टा कमलनयना केलिदीपभ्रमेण॥ कांते चोलं हरति हरितं लोलमालोकयंती नेत्रे प्र
च्छादयति सहसा पाणिपंकेरुहेण॥ २४॥ इत रदितरक्रियाकरणं क्रियायाः शीघ्रता
वाचपलता॥ मात्सर्यद्वेषादयो विभावाः॥ अनुभावा वैरिदर्शनवाक्पारुष्यादयः॥ य
था॥ लंकावारिणि सेतुकारिणि रणक्रीडाचमत्कारिणि प्रौढानंदवचःप्रसारिणि पु
रारामे धनुर्धन्वति॥ जाताम्नस्य दशाननस्य समरप्रारंभ देशं स्फुरत्केयूरक्वणिता
नुमेयविशिखत्यागाः करश्रेणयः॥ २५॥ चेतःप्रसादो हर्षः॥ प्रियदर्शनपुत्रजन्मा
दयो विभावाः॥ अनुभावाः स्वेदपुलकाश्रुस्वरभेदादयः॥ यथा॥ पुलकितकुचकुंभ
पालिराधा व्रजति मुकुंदमुखेंदुदर्शनाय॥ विरचयति न मध्यभंगभीतिं गणयति

प्रहारा

॥राम॥
॥२६॥

नापिनिवर्त्तवगौरवाणि ॥ २६ ॥ आकस्मिकेष्टानिष्टोपयातविवर्त्तः संभ्रमोवाआवेगः
वैरिदर्शनप्रियश्रवणोत्पातादयोविभावाः ॥ अनुभावास्त्वराशरीरस्खलनविप
र्यासादयो ॥ यथा ॥ एकोवाससिविश्लथेसहचरीस्कंधेद्वितीयः करः पश्चाद्गच्छ
तिचत्वरेकमितरद्वर्त्मुमुखेभ्राम्यति ॥ एकंकंटकविद्धमस्तिचरणंनिर्गंतुमुत्कं
ठतेचान्यद्वैरिमृगीदृशोरघुपतेरालोकसेनाचरान् ॥ २७ ॥ सकलव्यवहाराक्षम
त्वानवबोधोजडता ॥ नचमूर्छापस्मारनिद्रासुखेष्वतिव्याप्तिः ॥ तत्रज्ञानविरहात् ॥ न
चालस्यभीतित्रासेष्वतिव्याप्तिः ॥ तत्रतत्रकतिपयव्यवहारसत्वात् ॥ इष्टानिष्टद
र्शनादयोविभावाः ॥ अनुभावाः अनवभाषणनिर्निमेषप्रेक्षणाशनिशापरि
च्छेदादयो ॥ यथा ॥ दुःपारवारिनिधिपारमुदारवीरमागच्छतोहनुमतोहसितंवि
तेनुः ॥ उड्डीयनीरनिधिनीरमधीरवीचिः चित्रार्पिताइवपुनः कपयोबभूवुः

17

॥न.र.त.॥
॥२७॥

त्मनिसर्वाधिकत्वबुद्धिर्वासर्वस्मिन्नधमबुद्धिर्वागर्वः॥विभावाः बलैश्वर्याभिज
नलावण्यादयः॥अनुभावास्त्ववज्ञाभ्रूवेल्लितचेष्टितहसितपौरुषप्रकाशादयो
यथा परशुरामस्यवाक्यं॥निष्पीतेकमलोद्भवेनजलधौगौरीपतेर्भंगयाहेतुंहं
तवपुर्लसाटदहनेयावत्कृतःप्रक्रिमः॥तावत्त्वमयाविपन्ननगरीनारीदृशां
भोरुहद्वंद्वप्रस्खलदश्रुवारिपटलैःसृष्टाःपयोराशयः॥२९॥इष्टसंशयोः निष्ट
जिज्ञासावाविषादःइष्टपदेनजीवनधनयशःशरीरपुत्रकलत्रादयउक्ताः॥वि
भावाः॥अपराधगमनादयोनुभावाःउत्तमानांसहायान्वेषणोपायचिंतनादयो॥म
ध्यमानांविमनस्कता॥अधमानांध्यानधावनमुखशोषनिद्रानिश्वासादयो यथा
प्रत्यावृत्यदिद्विजातिभवनेवाचांभवेत्संभवोनिर्गच्छामिनिकुंजमेवयदिवाकोये
दकिंस्यादितः॥तिष्ठामिवयदिक्वचिद्वनतटेकिंजातमेतावतामध्येवर्त्मकलानि

॥राम॥
॥२७॥

धेः समुद्रयो मातः किमातन्यतां ॥२०॥ औत्सुक्यं कालासहिष्णुता ॥ सकलेंद्रियाणां एकदे
वक्रियारंभो वा ॥ प्रियसंस्मरणादयो विभावाः ॥ अनुभावाः ॥ तंद्रागात्रगौरवादयः ॥ यथा
ग्राह्यः कैरपि केलिकौतुकमनोराज्यैर्द्वितीयः पुनर्मल्लीकेसरचारचंपकनवांभोज
स्रजां गुंफनैः ॥ कांचीकुंडलहारहेमवलयन्यासैस्तृतीयस्ततो नीतः सुंदरि वासरस्य
चरमो यामः कथं यास्यति ॥२१॥ इतरदिंद्रियमपहाय मनस्स्वविषयदावर्त्तते तदा नि
द्रा ॥ भरतेनोक्तं ॥ स्वप्नवहनाडिकायां यदि मनो वर्त्तते तदा स्वप्नादिसंभवः ॥ तत्र वि
भावाः ॥ स्वभावचिंतालस्यक्लमादयः ॥ अनुभावाः पार्श्वकर्णभ्रूचलनविभ्रमवचन
स्वप्नदर्शादयो ॥ यथा ॥ गच्छन्कच्छंतपनदुहितुः पिच्छगुंजावतंसः पश्यन्नस्मद्व
दनमसकृच्चक्षुषा कुंचितेन ॥ स्निग्धापांगः शिथिलचरणः स्तोकविस्पष्टहासो दृ
ष्टः स्वप्ने कमलकलिकामंडनो मेघखंडः ॥२२॥ ग्रहाद्यावेशोऽपस्मारः ॥ विभावाः ॥ अ

र॰त पावित्र्यग्रस्थिति धातुवैषम्योत्कटदुःखभयादयोनुभावाः ॥ कंपफेननिश्वास
२८ भूपतननविपर्यासजिह्वालोलनादयो ॥ यथा ॥ उद्वेलन्नवपल्लवाधरदलः पर्यस्त २२
शाखाभुजाः स्फूर्जत्कोरकफेनबिंदुपटलव्याकीर्णदेहश्रियः ॥ भ्राम्यद्भृंगकला
पकुंतलजुषः श्वासानिलोत्कंपिताः शैले श्रेयसकपेर्निपातितमपस्मारं दधुः
भूधराः ॥ २३ ॥ मूर्छा चैवा चैवांतर्भवति ॥ त्वचमपि हायमनः प्रीनाति यदि वर्त्तते वि
तदा सुप्तं ॥ विभावो निद्रा ॥ अनुभावो नेत्रनिमीलनप्रलयश्वासोच्छ्वासादयो ॥ यथा
श्वासोच्छ्वासप्रचलदधरोपांतमामीलिताक्षं क्रीडाकुंजे तपनदुहितुः सुप्यतः
श्रीमुरारेरेतः स्मेरं निभृतनिभृतं कापि कर्णावतंसं ॥ क्राचिद्दोस्मोः कनकवलयं
दाममुष्णाति काचित् ॥ २४ ॥ इंद्रियाणां प्रथमप्रकाशो विबोधः ॥ निद्राच्छेदो विभावा राम
नुभावाः अंगाकृष्टिजंभाक्षिमर्दनांगुलीमोटनादयः ॥ यथा ॥ राधायाः सहसार २८

शाकुवलयद्रोणीदरिद्रं नभः कुर्वंत्याः कलकंठकंठनिनदैः सांकेतिकै र्जाग्रतः ॥ भ्रूभंगा
क्रष्टविवर्त्तमानवपुषो देवस्य कंसद्विषो लोलापांगतरंगभंगरचितं नेत्रांबुजं पातु
नः ॥ २५ ॥ पराहंकारप्रशमनोत्कटसमीहामर्षः ॥ विभावाः अवमानाधिक्षेपादयोनुभा
वाः स्वेदशिरःकंपनयनारुण्यादयो ॥ यथा ॥ अघाज्ञानैव भर्त्तुः सरसिजनयनासूनु
सेनासमेतं वध्वा लांगूलमूले दशमुखमभितो भूतले भ्रामयामः ॥ शश्वन्मार्गावलोक
प्रचलनयनया सीतया सा कमेनो लंकामुत्पाट्य किं वा रघुपतिचरणांभोजयोर्योज
यामः ॥ २६ ॥ आकारव्यवहारसंगोपनमवहित्थं ॥ विभावाः ह्रीजाधार्ष्ट्यकौटिल्यगौरवाद
योनुभावाः ॥ अन्यथावरणं अन्यथाकथनान्यथाप्रेक्षणादयो ॥ यथा ॥ सक्रोधस्य विभी
रावणमंत्री
षणः सगतवान्वद्धः सपाथोनिधिः किं चक्रु इति सोपसारणरतः सीतापरित्यज्यतां
इत्याकर्ण्य सुहृद्वचनं स्मेराननो रावणः मुक्तादामकरेण कंठसविधे कीरस्य

विन्यस्यति ॥२७॥ उग्रतानिर्दयता ॥ विभावाः ॥ अपराधदोषकीर्त्तनचौर्यदौर्जन्यादयः ॥
अनुभावास्तर्जनताडनादयः ॥ यथा ॥ कोदंडं रणभिन्नभूपतिभुजादंडैः प्रचंडं कृतं त
न्ज्यापतिपत्तराजरमणीवेणीगुणैर्गुंफिता ॥ क्रूराकारकुठारतारपतनप्रभ्रष्टदु
ष्टद्विपकुंभहंतदलैः कृतोस्ति विशिखस्तज्ञस्य मुह्यीस्यते ॥२८॥ यथार्थज्ञानं मतिः
विभावाः शास्त्रचिंतनादयोनुभावाः शिष्योपदेशभ्रूक्षेपकरचालनचातुर्यादयः
यथा ॥ लारीनेत्रपुटीपयोधरघटीक्रीडाकुटीदोस्तटीपाटीरद्रववर्णनेन कविभिः
र्मूढैर्हि निनीयते ॥ गोविंदेतिजनार्दनेतिजगतां नाथेति कृष्णेति च व्यापारैः समम
यस्तदेकमनसां पुंसां परिक्रामति ॥२९॥ नयविनयानुनयोपदेशोपालंभाः स्त्रैवां
तर्भवंति ॥ उपदेशो यथा ॥ वस्तु प्रदेयं खलतो विधेयं मनोनिधेयं चरणो हरस्य ॥ निजं
विधेयं कृतिभिर्विधेयं विधेर्विधेयं विधिरेव वेत्ति ॥३०॥ उपालंभो द्विविधः प्रणया

त्वाकोपात्माच ॥ प्रणयात्मा यथा ॥ पाषाणेयदिमार्द्दवंयदिपयोधाराहुताशोदरे म्लानीः
नांवदनेसुधायदिरवेर्गर्भेहिमानीयदि ॥ स्थेमाविंचसमीरणेयदितदास्वप्नेभवेत्
सत्यतांकिंनामस्मरभूमिपालभगवान्क्रोधान्मुधाधावसि ॥ २१ ॥ कोपात्माऽमर्ष
एवांतर्भवति ॥ यथा ॥ जनयसिजगदेवदेवदेवाभरणसुधारसशीतलंसुधांशोः
उरसिवहसिमेतथापितापंयद्दुपतिवक्त्रसखासिकिंब्रवीमि ॥ २२ ॥ ज्वरादिविका
रोव्याधिः कुपितधातुभयकामक्लेशादयोविभावाः ॥ अनुभावाःदृशोपद्रवादयः
वि४ यथा ॥ दातुंस्वीयमनर्घ्यदौतिपदंतस्याःकुरंगीदृशःकेयूरंकनकांगुलीयकमिवा
नेतुंवहिर्गच्छति ॥ अन्यन्न्क्रमनिवेदयामिकिमितोवेणीमिषात्कालियोदृष्टालो
चनवारिकालियसरोभ्रांत्यापरिभ्राम्यति ॥ २३ ॥ विनाविचारमाचारःउन्मादः ॥ नचा
गम्यागमनेतिव्याप्तिः ॥ विनाविचारमितिपदेनतत्रावर्त्तनात् ॥ तत्रसुखमुद्देशेन

र.त. दंशो विचारणं वाक्क्रियानसमीचीनाःस्युरेतत् ॥ प्रश्नेस्यकारिता उन्मादः इति यस्य मतं तत्रे
२. दं दूषणं ॥ विभावाः प्रियविप्रियवियोगविभवभ्रंशादयोऽनुभावाः वृथालपितवृथाहसि
तवृथारोदनादयो ॥ यथा ॥ नैषा काचिदिव क्वासि कांचनलतासेवास्मि मे राधिका एष्टा
चेन्नतु तेऽपि जल्पति तदास्ये मूर्छितावर्त्तते ॥ इत्थं हंत विचिंत्य सिंचति मुहुर्न्नीरैरधीरै
र्हशो वीतं व्यातनुते करेण भुजयो राधाय संभाषते ३४ ॥ प्राणनिष्क्रमणं निधनं ॥ वि
भावानुभावौ स्पष्टौ ॥ यथा ॥ पर्यस्तांघ्रिविकीर्णबाहु पततः संग्रामभूमौ भियालंके
शस्य न केशपाशमनिलस्पृष्टं समाकांक्षति ॥ उत्कंठोऽस्य करः करं किरति वा वक्त्रा
रविंदेन वा स्वेस्वेधाम्नि मिथः कथामपि सुराः प्रव्यक्तमातन्वते ३५ ॥ मनोविक्षोभः
त्रासः ॥ तथा च ॥ विचारोस्या मनःक्षोभो भीतिराकस्मिकमनःक्षोभः त्रासः इति वि राम
क्षोभेनैव द्वयोरप्येकत्वेनोपग्रहः ॥ विभावाः घोरस्वनश्रवणघोरसत्वदर्शनादयः २.

अनुभावाः स्तंभस्वरभेदरोमांचस्खलत्गात्रगौरवादयो ॥ यथा ॥ म्एवानोहरिनामरामव
दनादिंदुस्पर्शांकोवहन्नुर्वंन्कातरमाननंस भगवान्मैनाकभूमीधरः ॥ कुंचत्तप
ज्वलितिभुग्नितश्क्रतिह्नतनस्रंसंगचोलाहूतिस्यक्त्याहतिसिंधपंककुहरेनिमग्नकुमा-
कोनति ॥ ३६ ॥ विरावरोवितर्कः ॥ विभावाः विप्रतिपत्तिसंशयसाधकबाधकसमुद्भ
वनादयः ॥ अनुभावाः शिरःकंपभ्रूचलनादयः ॥ वितर्कश्चतुर्द्धा ॥ विचारात्मासंशयात्मा
अनध्यवसायात्मा ॥ विप्रतिपत्यात्मा उत्कटकोटिकः संशयः प्रत्येकमुदाहरणानि ॥
कालिंदीविलुठत्कठोरकमठः क्रूरंधनुःशांभवंरामोबालमृणालकोमलवपुर्वंशोव
तंसोभुवः ॥ आहारप्रखराः खलाः क्षितिभृतोगोष्ठीगरिष्ठापुनस्तस्मात्केवलमेवतिष्ट
तिममश्रेयस्करोभास्करः ॥ ३७ ॥ सौंदर्य्यस्यमनोभवेनगणनालेखाकिमेषाकृताला-
वण्यस्यविलोकितुंविजानातीमेषाकिमुद्दीपिका ॥ आनंदद्रुममंजरीनयनयोःकिंवास

॥ र॰ त॰ ॥
॥ २१ ॥

सुजृंभते ॥ राधायाः किमु वा स्वभावसुभगा रोमालिरुन्मीलति ॥ ३८ ॥ कथय कथय के
येयं वंजने लेखयंती विहरति यमुनायाः पाथसि स्वर्णवल्लिः ॥ अयमुदयति को वा शा
रदः शीतभानुस्तदुपरि तिमिरस्तोमेषको वा विवस्वान् ॥ ३९ ॥ इयं न विलसत्सुधाकर
कलाधिका राधिका करं किरणमालिनः किमु सहेत तस्या वपुः ॥ नवा कनकमंजरी
न वहति खंजरीटद्वयं स्तनः स्मरमदालसा कथय के यमुन्मीलति ॥ ४० ॥ ननु दशावस्थासु
अभिलाषगुणकथाप्रलापा व्यभिचारिभावाभ्यंतरेन गणिताः ॥ तत्किं स्वतंत्राण्येव
इति चेन्न औत्सुक्ये अभिलाषस्यावर्णनात्मकस्मृतौ गुणकथायाः उन्मादे प्रलापः
स्यांतर्भावात् ॥ अत्र प्रतिभाति छलमधिको व्यभिचारिभाव इति ॥ तांबूलहरणछले
नरभसा श्लेषोपि संविधीयत इति शृंगारे तत्राणनाम्न ॥ संगुप्तक्रियासंपादनं छले
विभावाः अवमानप्रतिपन्नचेष्टादयोनुभावाः वक्रोक्तिनिर्भर्त्सितस्मितनिर्भर्त्सनवीक्षण

॥ राम ॥
॥ २१ ॥

प्रकृतिप्रधारनादयः॥ शृंगारे यथा॥ संकेतीकृतकाननं प्रविशतोरन्योन्यकौतूहलादन्यत्व
प्रतिभातमाचरयतोरन्योन्यमुग्धस्पृतोः॥ कुंचित्कायमितस्ततः किशलयैरात्मान-
एव माच्छादयतोराधामाधवयोर्निकुंजकुहराडुड्डीविकापातु नः ४१॥ संग्रामे यथा॥ सद्यापि
हृष्टान्तकपदांबुराशीन्पुरोपकंठे पुनरीक्षमाणः॥ दशौकपीद्रस्य मुखे सखेदमादो-
जयामास सरामचंद्रः॥ ४२॥ सर्वाणि व्यभिचारिस्थलानि विस्तरभियानोपदर्शितानि
श्यालस्यौग्रजुगुप्साः संभोगवर्ज्याः विप्रलंभे श्यालस्यग्लानि निर्वेदश्रमशंकानिद्रौ-
त्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूया व्यभिचारिणः॥ हास्ये श्रविहित्थालस्य-
निद्राप्रबोधोभ्यसूया व्यभिचारिणः॥ करुणे मोहनिर्वेददैन्यजाड्यविषादश्रमापस्मा-
रोन्मादव्याध्यालस्यस्मृतिवेपथुस्तंभाश्च व्यभिचारिणः॥ रौद्रे उत्साहस्मृतिस्वेदावे-
गामर्षरोमांच व्यभिचारिणः॥ वीरे उत्साहमतिगर्वावेगामर्षौग्र्यरोमांचाः व्यभिचा

र.त.
२२

रिणः। भयानके स्तंभस्वेदगद्गदरोमांचवैवर्ण्यशंकामोहावेगदैन्यचापलत्रासाप
स्मारप्रलयमूर्छाव्यभिचारिणः॥ बीभत्से॥ अपस्मारमृतिव्याधिमोहावेगवैवर्ण्यानि
व्यभिचारिभावाः॥ अद्भुते॥ स्तंभरोमांचस्वेदगद्गदताश्रुविभ्रमताव्यभिचारिणः॥ अन्ये
चव्यभिचारिभावाः रसानुकूलाऊहनीयाः। स्थायिनोपिव्यभिचरंति॥ हासः शृंगारे।
रतिर्हास्यकरुणशांतेषु। क्रोधः वीरे। भयंशोकःशृंगारयोः। जुगुप्साभयानके। उत्सा।
हविस्मयौ सर्वरसेषुव्यभिचारिणौ॥ उत्साहोरौद्रहास्ययोरिति॥ इतिभानुदत्तविर
चितायांरसतरंगिण्यांव्यभिचारिनिरूपणंनामपंचमस्तरंगः॥५॥ अथरसान्निरूप्य
ते। विभावानुभावसात्विकव्यभिचारिभावैरुपनीयमानस्थायिभावः परिपूर्णोरसः
भावविभावानुभावव्यभिचारिभावैर्मनोविश्रामोयत्रक्रियतेसवारसः प्रत्येकं राम
विभावानुभावसात्विकव्यभिचारिभावाः नचपूनेः अपनानुरागेव्याप्तिः प्रबन्धस्था २२

यिभाववासनावारसः ॥ प्रबोधकाविभावानुभावसात्विकव्यभिचारिभावाः ॥ नचयूनोः
प्रथमानुरागेव्याप्तिः ॥ एवंानुभवाभावादितिवाच्यं ॥ तत्रापिजन्मांतरीयानुभवसत्वा
दिति ॥ सचरसोद्विविधः ॥ लौकिकोऽलौकिकश्चेति ॥ लौकिकसन्निकर्षजन्मारसोलौ
किकः ॥ अलौकिकसन्निकर्षजन्मारसोऽलौकिकः ॥ लौकिकसन्निकर्षः षोढाविष
यगतः ॥ अलौकिकसन्निकर्षोज्ञानं ॥ तेषुचानुभूतेषुज्ञानं ॥ एतज्जन्मानन्नुभूतेष्व
पितेषुप्राक्तनसंस्कारद्वाराज्ञानमेवप्रत्यासत्तिः ॥ अलौकिकःरसस्त्रिधा ॥ स्वाप्नि
कोमानोरथिकऔपनायिकश्चेति ॥ औपनायिकश्चकाव्यपदपदार्थचमत्कारेनाटचे
च ॥ परंतुद्वयोरप्यानंदरूपता ॥ ननुमानोरथिकोरसोनप्रसिद्धइतिचेन्सत्यं ॥ धन्या
नांगिरिकंदरेनिवसतांज्योतिःपरंध्यायतामानंदाश्रुजलंपिबंतिशकुनानिः
शंकमंकेशयाः ॥ अस्माकंतुमनोरथोपरिचितप्रासादवापीतटक्रीडाकाननकेलि

॥र.त.॥
॥२३॥

कौतुकतुषामात्रः परंसीयते । इत्यादौमानोराधिकश्रृंगारस्यश्रवणात् । शास्त्रेसुरवस्यैवैवि
विधिमार्गणानाद्य रसेनविनासुखास्यान्नेरिति । तत्रविशेषस्तत्रभरतः । श्रृंगारहास्यक
रुणरौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञाचनाट्येचाष्टौरसास्मृताः । सकलाधि
दैवतंविष्णुःसचश्रृंगारस्यदैवतं । तेनसकलाराध्यतयासकलाकांक्षाविषयत्वे
नचाग्रथमंश्रृंगाररसस्योपन्यासः । ननु वात्सल्यलौल्यंभक्तिःकार्पण्यंवानकथं
रसः । [illegible]तामिलाषश्रद्धास्पृहाणांस्थायिभावानांतत्रसत्वादितिचेन्नतेषांव्यभि
चारिरसात्मकत्वात् । ननुकस्यरसस्यतेव्यभिचारिभावाःभवेयुरितिचेत्सत्यं । वा
त्सल्येकरुणोरसः । लौल्येहास्यः । भक्तौशांतः । कार्पण्येहास्यः । नन्वेवंपरब्रह्मप्रसत्वा
त् । ग्रत्रव्यभिचारित्वेनस्रावश्यकत्वात् । धर्मिकल्पनातोधर्मकल्पनायालघुत्वाच्च ।
व्यभिचारिरतिरेवास्तुकिंकरणेनइतिचेन्न । रतेःशोकःइतिशोककारणतयारूपल

॥राम॥
॥२३॥

त्तणत्वात् । किंच रतेः कस्य रसस्य व्यभिचारित्वं । न शृंगारहास्यवीररौद्राणां युक्तमिथुनय
रस्य रश्रीति हास्यक्रोधानां दानां तत्राभावात् । न बीभत्सस्य जुगुप्सायाश्च भावात् । नाद्भुत
स्य तत्र तिष्ठतोपि विस्मयस्यास्थिरत्वात् । तस्माच्छोकस्य स्थायित्वयास्थायी शोकभावः
करुणाख्यो निरिक्तः रसः इति । ननु रतिरेवास्तु किं हास्येनेति चेत् । स कस्यास्तु व्यभिचा
री । करुणरौद्रवीरभयानकबीभत्सानां तत्रानवकाशात् । नाद्भुतस्य विस्मयस्य तत्रास्थि
रत्वात् । न शृंगारस्य । रतेः स्थायित्वाभावात् । परंतु रत्यासमं हासस्य सांकर्यं । ननु रतिहा
स्ययोरसंकीर्णस्थानाभावात्स्थयत्वं कुतः स्यादिति चेन्न हेतोरसाधारण्यात् । असाधा
रणमत्र स्थायित्वे । यथा रतेः सांकर्येपि स्थायिशोकादसाधारणकारणात् । करुणोभि
द्यते । तथा । तत्सांकर्येपि स्थायिहासभावादसाधारणकारणाद्धासोभिद्यते । शांताव
प्येवमूह्यं । न चैवात्सत्यादावपि असाधारणहेतवश्चाहं तादयः संति तेषामपि रसत्वा

॥र. त.॥
॥२४॥

पत्तिरितिवाच्यं। आईनादीनामपिरतित्वात् तस्याश्चतत्रासाधारण्येपशृंगाररसत्वाप॰
ननूत्साहक्रोधाश्चभयत्रतस्मात्। वीररौद्रयोरन्यतरएकएवरसोवर्त्तनामितिचेन्नस्था
यिभेदेनभेदात्। उत्साहवासनावीरेनतुरौद्रे। क्रोधवासनारौद्रेनतुवीरे। तेनमतएव
तवसर्वत्रसाक्षीति। यूनोःपरस्परंपरिपूर्णःप्रमोदः सम्यक्संपूर्णोरतिभावोवा
शृंगारः। यूनोरेकत्रप्रमोदस्यरतेर्वाधिक्येन्यूनतायांव्यतिरेकोवापरिपूर्त्तेरभावा
द्रसाभासइति। सचद्विविधः। संभोगोविप्रलंभश्चेति॥ तत्रदर्शनस्पर्शनसंलापादि
भिरितरेतरमनुभूयमानंसुखंपरस्परंसंयोगेनोत्पद्यमानश्चानंदोवासंभोगः
संभोगोबहिरिंद्रियसंबंधः। अस्यदैवतंविष्णुः। वर्णःश्यामः। यथा। स्तंभेनबाहुवचना
निपराहतानिपाणिःपयोधरगतोजडतांजगाम॥ लज्ज्याःपरंतुपृथुवेपथुरेवनीवी
विश्रंसयन्नसुहृदभून्मधुसूदनस्य॥१॥ निद्राणेनयनेप्रसुन्नमय्यवदनेकोतेकुचौतेस्य

॥राम॥
॥२४॥

शिखस्तबस्तदुकूलदर्शितवलिः प्रव्यक्तिनाभिस्त्रियः॥ राधायादरघूर्णदुत्पलदलद्रो
णीमदद्वेहिभिर्द्रष्टोणस्यतरंगितैर्विरचितोदीर्घायुरेवस्मरः॥२॥ देशानांसमयानां
नायकानांचभेदेननायकयोरवस्थाभेदेनबहवोभेदास्तेचरसमंजर्यांनिरूपिताः
इहविस्तरभियानप्रदर्शिताः॥ अथहावाःनिरूप्यंते॥ तत्रभरतः॥ लीलाविलासोवि
छित्तिर्विभ्रमःकिलकिंचितं॥ मोट्टायितंकुट्टमितंविब्बोकोललितंतथा॥ विहृतंचे
तिविज्ञेयादशहावास्तुयोषितां॥ नारीणांशृंगारचेष्टाहावः॥ सचस्वभावजोनारीणां
ननुविब्बोकविलासविछित्तिविभ्रमःपुरुषाणांसंभवंतीतिचेत्सत्यं॥ तेचतेषां
मोपाधिकाःस्वभावजानारीणामेव॥ नन्वेवंयदिसदैवतासांतेकथंनभवंतिइतिचे
त्सत्यं॥ उद्दीपकान्वयव्यतिरेकाभ्यांतासांनायकानांहावाविर्भावतिरोभावइति॥
विभ्रम लीलाविलासविछित्तिललितानिशारीराणि॥ मोट्टायितविब्बोककुट्टमितानि

हृतानिश्रांतशाणि। किलकिंचितसुभयत्रसंकीर्णमिति। प्रियविभूषणवचनाद्यनु॰
कृतिर्लीला। तत्रविभावाः सखिकौतुककलापः। अनुभावाः प्रियपरिहासः। यथा
चंडांशोर्वरमाद्रिंतुंवनिमनोजिज्ञासितुंसुभ्रुवोन्यंचत्कौतुकयातयाविरचितेवंशीध
रेराधया॥ राधः स्फूर्जतिकस्यनिःस्वनइतिक्रोधाद्भुजंकाननेराधांवीक्ष्यलतापता
नपिहितोस्मेरोहरिःपातुनः॥२॥ गमनवदनभूनयनादीनांयत्कश्चिद्दृस्यतेवि
शेषःसविलासः। अत्रविभावाः। प्रियदर्शनस्मरणादयोनुभावाः। अभिलाषवैद
व ग्ध्यप्रकाशनसंकेतप्रकटनश्रीतिकटनादयो। यथा। कूजत्कोकिलदरस्फुरद्दलितट
भूवल्लिवेल्लद्धपुर्वल्लालुंजत्कोतिसाचिवलितग्रीवालयंत्याबचः। प्रातर्नर्त्तित
ट पुंडरीकपरिषत्पाडित्यपांडुरीदृष्टिर्यंप्रतिजायतेवरतनोर्वक्रासशक्राधिकः॥३॥
कतिपयभूषणविन्यासोविच्छित्तिः॥ तत्रविभावाः॥ सौकुमार्यंप्रियसौभाग्यसौं

दर्प्यंगर्वक्रोधक्लेशप्रकाशादयः । अनुभावा गर्वमानादयो ॥ यथा ॥ मंजीरं न पदे करे न कट
कं मौलौ न माला पुनः कस्तूरीतिलकं न थापि तनुते संसारसारश्रियं ॥ सर्वाधिकामले
रिवभालफलके यद्धृधसा सुभ्रुवो जानीमः किमु तत्र मन्मथमहीपालेन मुद्राङ्कृता ॥ ४
वागंगविभूषणानां विपर्यासो विभ्रमः । विभावा मदरागोत्कंठादयोऽनुभावाः प्रिय
सख्याद्युपहासादयः ॥ यथा ॥ त्यक्त्वा केलिविधौ निजांशुकधिया पीतांबरं स्वांशुकं प
त्न्याः परिधाय पद्मशयनात् प्राप्तः प्रयांत्या बहिः । आरात्तु वसनांचलं चपलयन्
कोपं दृशा दर्शयन् वाचा कौतुकमाचरन् स्मितसुधास्निग्धो हरिः पातु नः ॥ ५ ॥ श्र
माभिलाषगर्वस्मितहर्षभयक्रुद्धासंकरः किलकिंचितं ॥ तदाह भरतः ॥ श्रमाभिला
षगर्वाणां स्मितहर्षभयक्रुधां ॥ असकृत्संकरः प्राज्ञैर्विज्ञेयं किलकिंचितं ॥ अत्र वि
भावाः । नवयौवनोद्भेदचांचल्यादयः । अनुभावाः । कर्तव्यानिर्धारणादयो ॥ यथा ॥ कोदं

॥र.त.॥ उमारोहतिचंडमानेमथभ्रूतःकांतातिशोणमाने। पद्मेसुधावर्षतिवेपमानेस्वर्णाः
॥२६॥ चलःस्विद्यतिकिंनिदाने॥६॥ क्रोधागारसमुत्थिताःसमुदयत्संत्रासमत्तैलार्दिताब्रीडा
भिःपरिमर्दितास्मितसुधाधाराभिरुद्दर्त्तिताः। स्नातास्नेहरसैर्मनोभवकलामाला
भिराभूषिताः। पायासुर्ममशैलराजदुहितुःस्फीताःकटाक्षच्छटाः॥७॥ वार्त्तावैमु
ख्येसतिनिर्भरतभूयोदर्शनस्पृहामोहायितं॥ अत्रविभावाः। सपत्नीत्रासलोकत्रास
लज्जादयः। अनुभावाः। मनःक्षेमकथनसंकेतनिवेदनादयः॥ यथा॥ नस्नेहस्यकथा
रसंकथमपिश्रोतुंसमुत्कंठतेराधाकिंतुविकीर्णरत्नकपरागात्यसौधाद्बहिः।
न्नत्यन्नेत्रपुटिस्फुरत्कुचतटिस्वेदोल्लसद्दोस्तटिव्यावल्गद्भ्रुकुटिस्खलत्पदिपुनःक्ष
ष्मांतिकेभ्राम्यति॥८॥ दुःखेसुखचेष्टाकुट्टमितं॥ तत्रविभावाः। रागोत्कंठदशनकर ॥राम॥
जक्षतकुंतलाधरग्रहादयः॥ अनुभावाः। कपटकायसंकोचाकपटसीत्कारादयः। यथा ॥२६॥

रोद्धुंपाणिःप्रचलतिचिरादंगुलैर्निस्खलासौभ्रूविक्षेपोभवतिकुटिलोनेत्रमंतःप्रसन्नं
गाढाश्लेषेभवतिसुतनोरद्यमात्रोसकारःकंपोमन्दःप्रसरतिमुखंसन्मुखेनप्रयाति।९
गर्वाभिमानसंभूतोविकारोनादरात्मकोविब्बोकः।अत्रविभावाः।यौवनमदधनमद
कुलमदप्रियापराधादयः।अनुभावाः।अवहित्थदुर्वचनदुःप्रेक्षणादयः॥यथा॥कृतांज
लिःकांतरदृष्टिपातःप्राणेश्वरःपार्श्वमुपाजगाम।सखीमुखेकुंडलरत्नलेखांपुनःपुनः
प्रेक्षितुमाचकांक्ष॥१॥सकलांगसमीचीनभूषणविन्यासोललितं अत्रैवस्मितादयोंत
र्भवंति।तत्रविभावाः।मनःप्रसादप्रियतमहृदानुरागधीरत्वादयः।अनुभावाः।प्रियव
शीकरणलोकानुरागचमत्कारादयः॥यथा॥कलक्वणितमेखलंचपलचारनेत्रांचलंप्र
सन्नमुखमंडलंश्रवणसंचलत्कुंडलं।स्फुरत्पुलकवंधरंल्लापितशोभमानाधरंविहस्य
कमलेक्षणाव्रजतिकस्यकेलिगृहं॥२॥प्रियसन्निधावभिलाषापरिपूर्णैर्विहृतं।तत्र

॥र.त.॥ व्याजलज्जादयोविभावाः।अनुभावाःअन्यथाचेष्टितअन्यथाव्यवहारादयः।व्याजंयथा।अ
॥२१॥ भिलषतिकपोलेचंद्रचूडेविधातुंतिलकमुदयदंतःकोपभाजाभवान्या।फणपतिभयकूटा
दंगमुत्कंपयंत्याप्रचलवसनवातैर्विघ्नितःकेलिदीपः।२२।लज्जातोयथा।आनंदभाजौय
दुनंदनस्यकरावरोधेनकरेणकुर्याः।सखीलपंतीमितिसंजघानचकोरनेत्राकुलको
दकेन।२३।यूनोरन्योन्यमुदितानांपंचेंद्रियाणांसंबंधाभावोभीष्टाप्राप्तिर्वाविप्रलंभः।न
चमानात्मकेविप्रलंभेव्याप्तिः।मुदितपंचेंद्रियसंबंधाभावरूपस्यविशिष्टाभावस्यतत्रापि
सत्वात्।तदानींयूनोरिंद्रियाणांमुदितत्वाभावात्।ननुप्रियसन्निधौयागच्छतिसाविप्रयुक्ता मभि
भवेदितिचेत्सत्यंसाविप्रयुक्तैव।अचिरदर्शनप्रत्याशाप्रमोदेनविरहधर्मस्याप्रपादे
रसंभवइति।सचविप्रलंभःपंचधा।देशांतरगमनात्।गुरुनिदेशात्।अभिलाषात्।ईर्ष्या ॥राम॥
तःशापाच्चेति।समयाद्दैवात्द्विडुरादित्यादयोप्युन्नेयाः।देशांतरगमनात्।यथा।प्रस्था ॥२१॥

नायकृतो यथा मे प्रियतमे दोःकंकणेन क्षतं धैर्येण स्खलितं मदेन गलितं नेत्रांभसा निःसृ
तं ॥ जीवेनापि पुरैव यातमसुना शिव शिव प्रारंभि वामभ्रुवः कंपादोल्लसितकिंकिणीकलरव
व्याजेन वैलपस्मृतिः ॥ २४ ॥ यथा वातातनचरणनो ॥ वीणामंकेकृत्य मपि सखी प्रार्थनाभि
र्विधाय स्वैरं स्वैरं सरसिजदृशा गातुमारब्धमेव ॥ तं त्रीवुध्वा किमपि विरहक्षीणदीनांग
वल्ली मे नामैव स्पृशति वहुशो मूर्छनाश्चित्रमेतत् ॥ २५ ॥ गुरुनिदेशाद्यथा ॥ भास्वास्त्वतन
रंगुरुमनंन सिजः कोप्येष भृंगास्तमो मंदो गंधवहः सितो मलयजो दोषाकरो माधवः ॥ श्रृं
गारो नवपल्लवः परभृतो विज्ञो गुरोराज्ञया निर्यातो स्मि विचारिताः कथमसी क्रूरास्त्वया
न ग्रहाः ॥ २६ ॥ अभिसारो यथा ॥ आगाराभिमुखं मुखं रचयतो र्वक्रीकृतग्रीवयोर्यस्तं वोलम
जानतोः क्वचिदपि माजानुनस्तिष्ठतोः ॥ मार्गं विस्मरतोः क्वचिल्लकुविदपि त्यक्त्वा तरं
जल्पतोः सा त्रिस्त्रेहितमावयोर्यदभवद्रूयस्तदाशास्महे ॥ २७ ॥ ईर्षातो यथा ॥ प्राणेश स्व

॥र॰त॰॥
॥२२॥

प्रभवति मनः प्रेमहेमप्रसूनं चेतनाम्रतं हगपि कमलं जीवनं वेधजीवे। आशासूत्रेग्र-
थितमखिलं वेध सा तस्य भंगे स्यादेतेषामपि निपतनं चंडि मानं विमुंच ॥२८॥ शा-
पाद्यथा॥ अन्यत्र यदि निर्गंतुमिच्छसि गच्छ दूरतः॥ प्रियाविरहतापेन शापदग्धो भ-
विष्यसि॥२९॥ सम्भ्रमाद्यथा॥ विश्लेषजीवनं क्रीडापीडाविधुरमानसा॥ तस्थौ प्रातः प्रि-
परामृस्यवचनं यं प्रेक्ष्य चक्री वक्रीकृतानना॥३०॥ दैवाद्यथा॥ जीवने यदि विश्लेषो विश्लेति सति जीव-
नं॥ द्वयोरप्यनयोर्यूनोरहमेव निदर्शनं॥३१॥ विदूराद्यथा॥ केलीगेहे वा मणिमंदिरे-
वा शाशाम्यते का नगरे कुताशः॥ इतस्ततः प्रस्थितयोश्च यूनोर्वियोगजन्मा विरराम
वह्निः॥३२॥ इति भानुदत्तविरचितायां रसतरंगिण्यां शृंगारनिरूपणं नाम षष्ठस्तरंगः॥६
हासस्य परिपोषो हास्यः॥ स च द्विविधः॥ स्वनिष्ठः परनिष्ठश्चेति॥ तावप्युत्तममध्यमाध- ॥राम॥
मभेदात्त्रिविधेति॥ पुनश्च स्मितहसितादिभेदेन स्वनिष्ठः परनिष्ठश्च षड्विध इति द्वाद ॥२९॥

शभेदोहास्यः।तथाहि।उत्तमानांस्वनिष्टपरनिष्टंचस्मितहसिते।।मध्यमानांस्वनिष्टप
रनिष्टंविहसितोपहसिते।अधमानांस्वनिष्टंपरनिष्टंचअपहसितातिहसिते।।उत्तमा
नामीषद्विकसितकपोलमलक्ष्यदशनमपांगसुष्टुवीक्षितंस्मितंस्वनिष्टंपरनिष्टंच
विकसितकपोलमुखमाननमीषल्लक्षितदंतंहसितंस्वनिष्टंपरनिष्टंच।।मध्यमानांस
मयोचितमुन्नमस्वनमाकुंचितमुखमाविर्भूतवदनरागंविहसितंस्वनिष्टंपरनिष्टंच
उत्फुल्लनासापुटंकुटिलदृष्टिवीक्षितंकुंचितग्रीवंस्फुटतस्वनमुपहसितंस्वनिष्टंपर
निष्टंच।अधमानामुद्धतमुपदस्फकंपितमौलिस्फुटतरस्वनमपहसितंस्वनिष्टंपर
निष्टंच।अत्युद्धतमतिबहुलाश्रुस्फुटतमस्वनमाक्लिष्टपार्श्वजनमारब्धकरतालम
तिहसितंस्वनिष्टंपरनिष्टंच।।स्वनिष्टंस्मितंयथा।लेखिनीमितइतोविलोकयन्कुत्र
कुत्रनजगामपद्मभूः।तांपुनःश्रवणसन्नियोजितांप्राप्यसन्नतमुखःस्मितंदधौ।।२।।

वराहावतारे २

॥र० त०॥ स्वनिष्ठहसितं यथा ॥ रोमांकुरं व्योमगतं रदाग्रमुद्वीक्षतिं स्वीयमुदीस्य विष्णोः । यदासहास्यं कि

॥२९॥ मु तत्र योधाव द्याधिपेन स्तव कादमानं ॥२॥ परनिष्ठं स्मितहसितं यथा । हरवृषभमुखे

स खेलमायोजयति स्मुवर्णं सवर्णं कोतिपर्णो ॥ इ शिभुजगपतेः शिशुः षडास्यः [illegible] ति

कलयति कज्जलमंतिके भवान्याः ॥३॥ विहसितं परनिष्ठं यथा । निशासु तैलस्पर्धिया प

हीतैर्मषीजलैर्लिप्तमुखारविंदं गोपं प्रभाते स्खलदक्ष्णनीरमधीरनादं जहसुः स्मरूपः ॥४॥

उपहसितं परनिष्ठं यथा । योनिरोधोमयारब्ध इति पद्यं पठन् पुनः । शश्वद्रुत्फुल्लनासे

न तत्र स्यनोपहस्यते ॥५॥ अपहसितं परनिष्ठं यथा । रतोल्मवेवज्रभयत्तसूत्रं कंठावल

ग्नं परिमोचयंती द्विजांगनोरीर्घतरं भसंतीतास्वरं वारवधूर्जहास ॥६॥ अतिहसितं प

रनिष्ठं यथा । वीरः कामरिपोर्गृहे निशिगतः स्थूलं कपालं हरन् वीजं धत्तेफलस्य तंडुलधि ॥रा० म०॥

यानीत्वा पुनर्भुक्तवान् । व्यावर्त्तनप्रचलनस्खलनपरिपतनमुद्यान्विघूर्णनहसन्नहहाह ॥२९॥

अविमुक्तमौलिकुसुमंस्ववैशय्याहस्यतेनु ॥७॥ शोकस्यपरिपोषःकरुणः ॥ आशाविच्छेदेसति
सर्वेंद्रियक्षमोवाकरुणः ॥ नचविप्रलंभेप्याप्तिः । तत्रेष्टशाश्याःसत्वात् । तद्विछेसतिसच देर
विप्रलंभःकरुणएव । शोकोदुःखंवर्णोस्यकपोतवच्चित्रितः । दैवतंवरुणः । सचकरुणः ।
स्वनिष्ठःपरनिष्ठश्चेति । स्वशापस्वबंधनस्वक्लेशस्वनिष्टैर्विभावैःस्वनिष्ठः । परेष्टनाश
स्मरणे परशापपरबंधनपरक्लेशादीनांदर्शनश्रवणैर्विभावैःपर निष्ठः । स्वनिष्ठोयथा । तव
मा नाथशरःशरासनेनवदेहेनसहैवभस्मीत । अहमस्मिततःप्रतीयतेतवनास्मीतिकि
मुत्सनामितः ॥८॥ परनिष्ठोयथा । अनुवनमनुयांतेबाष्पवारित्यजंतेमदुलकमलदा
मस्तामममालोकरामे । दिनमपिरविरोचिस्तापमंतःप्रसूतेरजनिरपिचधत्तेतारकाबा
ष्पविंदून् ॥९॥ परिरुणःक्रोधःरौद्रः । सर्वेंद्रियाणांमोहदत्यावा । वर्णोस्यरक्तः । दैवतंरुद्रः । य
था । चंडांशुःकिंनवक्त्रंभुजगपतिरसौवर्त्ततेकिंनपाशःकुंताःकिंदंतिदंताःनचगिरि

॥र॰त॰॥
॥३॥

रशनिःकिंवशास्त्रैःकिमन्यैः॥भीमोहंदुष्टदुर्योधननिधनसमुद्दंडवाहुप्रकांडःप्रमादस्य
प्रकोपप्रलयकृतवहोनास्मिकस्यापिवश्यः॥२॰॥यथावाक्रीडानुगतरंगारापपदलीरव
धौन्ह्रतोद्यौधरश्रेणीस्फूर्जितधूलिघोरगणितमसोमावलीढंजगत्॥वहुस्पर्शकरीद्रवे
ढवरणप्राभुग्नभोगीश्वरग्रग्रोदग्रफणाग्ररत्नरुचिभिर्विद्योतयामोवयं॥३॥परिपूर्णः
उत्साहःसर्वेंद्रियहर्षोवावीरः।वर्णोस्यगौरः।दैवतंशक्रः।सचत्रिधा।युद्धवीरदानवीरद
यावीरभेदाच्चेति।द्वयोस्तुविशेषः।सचोत्साहोयुद्धवीरेप्रतापाध्यवसायादिप्रभवः।द दानवीरेदा
यावीरेआर्द्रतादिप्रभवः।प्रतएवपुत्रजन्मनिनातिव्याप्तिः।युद्धवीरोयथा।संग्रामांग नसामर्थ्यादि
णमागतेदशमुखेसौमित्रिणाविस्मितंसुग्रीवेणविचिंतितंहनुमताव्यालोलमालोकि प्रभवः५
ते।श्रीरामेणपरंतुपीनपुलकस्फूर्जत्कपोलश्रियासांद्रानंदरसालसानिदधिरेवाण
सनेदृष्टयः॥२२॥दानवीरोयथा।अभ्यागछतिमंदिरेद्विजकुलेखंडायखंडंभुधिंनारा ॥राम॥

॥३०॥

ध्रिं लवणाय दुग्धजलधिं दुग्धाय चेद्दास्यति । दुर्वारो विरहो भवेदिति धियाश्रीनेव दि-
व्यात्मजायस्याब्धिं न जहाति विष्णुवपुषे रामाय तस्मै नमः ॥ २२ ॥ दयावीरो यथा ॥ दयावी-
जं हरेर्नेत्रमुकुरस्तत्र भास्करः ॥ ततः समुत्थितावेतौ पद्मवीरामलक्ष्मणौ ॥ २४ ॥ भयस्य
परिपोषो सर्वेंद्रियविक्षोभो वा भयानकः ॥ वर्णोस्य श्यामः ॥ दैवतं यमः ॥ स च स्वनिष्ठः
परनिष्ठोपि ॥ स्वापराधात्स्वनिष्ठो यथा ॥ गोपीक्षीरघटीविलुंठनविधिर्व्यापारवान्नावि-
दोः पित्रोस्ताडनशंकया शिशुवपुर्देवः प्रकाशज्वरं ॥ रोमांचं रचयन्दृशौ मुकुलय-
न्श्वस्यंगमुत्कंपयन्सीत्कुर्वन्नतमसि प्रसर्पति तिरां हन्तून्नं समागच्छति ॥ २५ ॥ पर-
निष्ठो यथा ॥ गंगायाः सलिले निमज्जति जटाजूटे परिभ्राम्यति भ्रश्यत्यस्ति हुताश-
ने फणिफणाभोगेष्वाविलीयते ॥ कुब्जीभूय हरस्य कर्णसुषिरं निर्गंतुमुत्कंठते रा-
होरास्यामुद्रीस्य किं न कुरुते बालस्तुषारद्युतिः ॥ २६ ॥ विकृतनिनादात्परनिष्ठो यथा

३१

॥र.त.॥ कुर्वाणोदशभिर्मुखैर्दशमुखेनादंस्तुरैःकंपितंदिग्नागैस्खलितंरवेरपिहयैस्तच्छ् तु
॥३१॥ माधावितं॥सुग्रीवस्तुसमुच्छलज्जलनिधिव्यालोलवीचिभ्रमिभ्रस्यन्सेतुविशं
कयाहनुमतावक्रेक्षितोसंदधे॥१७॥जुगुप्सायाःपरिपोषोवीभत्सःसर्वेंद्रियासं
कोचोवा॥वर्णोस्यनीलः।दैवतंमहाकालः।स्वनिष्ठःपरनिष्ठश्चेति।स्वनिष्ठोयथा
कालीकुंडलिनीकुतूहलमिथःप्रारब्धयूथूत्कृतिन्यंचद्दीविष्वलाद्विहायसिच
लाच्छ्रिलीनिपातस्पृशि।बद्धस्पर्द्धविपद्यपदिरुधिरस्रोतस्वतीस्रोतसिभ्रश्यपं
स्तुद्भ्रमतिस्खलन्यथ्यरणक्रोधाकुलोभार्गवः॥१८॥परनिष्ठोयथा।छत्रेकुंभीद्रः
कर्णोविरचयतन्तुंतोचामरंवाजिपुच्छैर्मालामुंडैःप्रचंडैःसजगाजजघनेमुंड
दंघोजयस्व।श्रृंत्रैर्नोरजनाथाःकलयविधिमितिप्रेतवद्धांगनानामालापःकुं ॥राम॥
डलिन्यास्तनयपरिणयारंभजन्माबभूव॥१९॥विस्मयस्यसमयकृत्समद्धिरद्रु ॥३१॥

तः वर्णोस्य पीतः दैवतं ब्रह्मा ॥ स च स्वनिष्टः परनिष्टश्च ॥ स्वनिष्टो यथा ॥ लीलाभि
वृद्धपाथोधिं हेलाहतदशाननं ॥ स रामः सीतयाश्लिष्टं आत्मानं बहु मन्यते ॥ २०
परनिष्टो यथा ॥ स्नक्काजीर्णदुकूलबद्धसुमतीवद्धो बुधि विंदुवत् बाणाग्रेण जर
त्कपोतक इव व्यापादितो रावणः ॥ लंकां कापि विभीषणाय सहसा मुद्रेव हस्ता
र्पिताश्चैव रघुनंदनस्य चरितं को वानरो मांचति ॥ २१ ॥ भ्रमुक्ति भ्रमोक्ति वि
वोक्ति विरोधाभासभरतयोऽद्भुता एव ॥ भ्रमुक्तिर्यथा ॥ भ्रूयाद्देषसततं हिताय भ
गवान् कोलावतारो हरिः सिंधोर्लेशमपास्य यस्य दशनप्रोतस्थिता या भुवः
ताराहारति वारिदाल्लिलकति स्वर्वाहिनी माल्यति क्रीडादर्पणति द्विपापापति
र हर्द्वेच चक्रनाटंकति ॥ २२ ॥ दिग्वहहरेर्मुखकुहरे विस्तीर्णे पर्णति व्योम ॥ चूर्णति
चेद्रः क्रमुकति कनकगिरिः खदिरसारति स्वरांशुः ॥ २३ ॥ भ्रमोक्तिर्यथा ॥ नीवे

॥र॰त॰॥ क्तिग्मरश्वःकरैः परिचिनांसेन्क्रुंकपोलस्थलीनीराणां निकरं वरेण हरतानुष्ठी
॥३२॥ कृतेनीरधौ॥मैनाकं समुद्रौस्यपंकपतितं शालूकशंकाजुषा हेरंबस्य गुनानुदं
तशिखरव्यापारलीलास्परः॥२४॥ग्रंतःक्रोधाग्रजाग्रत्कपटनरहरिः स्फारनिश्वास
वातव्याधूतनारिवाहाःकुलधरणिभरतःसानुष्ठुघस्खलंतः॥दिग्नागोनागावुद्या
वनहरिणकुलैः शंकयाशार्दूलानां छायाभ्रांत्या किरातैः सितवसनधियावीति
तास्ववंधुभिः॥२५॥विरोधाभ्रियथा॥गिरिर्वमति मौक्तिकावलिमलिद्वयंस्याव
रं शरनुहिनदीधितिर्व्यजनमारुतं वांछति॥धनुःस्वपतिर्मन्मथो शिथिलवंध
नं वंधनं तमोमनस्विजायते किमपिकौतुकंतन्वते॥२६॥सा तत्र एकमखिलं वि
रोक्तिरेव॥विरोधाभासोयया॥कोप्यसौनवमुकुंदनंदको निंदकोभवति कं
ससंपदः कुंडलीनमसिकालियं कुतो दूरतो नयसितन्निवेदय॥२७॥नात्येव ॥राम॥
॥३२॥

सर्वैरसास्वानंदरूपाः। अद्भुताख्यापरनिष्ठएवेति॥ चित्तवृत्तिर्द्विधा॥ प्रवृत्तिनिवृत्ति
श्चेति। निवृत्तौयथाशांतिरसस्तथाप्रवृत्तौमायारसःस्थितिप्रतिभाति। एकश्चरसोत्य
न्तिरपरत्वेनेतिवक्तुमशक्यत्वात्॥ नचसारतिरेव॥ सकस्यास्त्वव्यभिचारी॥ नशृंगा
रस्यतद्वैरिणोबीभत्सस्यापितत्रसत्वात् अतएवनबीभत्सस्यापि॥ नहास्यस्य
तद्वैरिणःकरुणस्यापितत्रसत्वात्। अतएवनकरुणस्यापि॥ नरौद्रस्य॥ तद्वैरिणो
द्भुतस्यापितत्रसत्वात्। अतएवनाद्भुतस्यापि। नवीरस्यतद्वैरिणोभयानकस्यात्र पि
त्रसत्वात्। अतएवनभयानकस्यापि॥ नापिशांतस्य। तद्विरोधित्वात्। नचसत्वसा
मान्यएवरसस्तद्विशेषास्तरेभवेति। शांतिरसस्यतर्हिरसाभावत्वापत्तेः किंतुवि
घ्नतश्च रतिहासक्लेशशोकक्रोधोत्साहभयजुगुप्साविस्मयास्तत्रोत्पद्यंतेवि
लीयंतेतेननतत्रतत्रतेव्यभिचारिभावाइति लक्षणेनप्रवृत्तामिथ्याज्ञानवास

॥र॰त॰॥ नामायारसः॥मिथ्याज्ञानमस्यस्थायीभावः॥विभावाः।संसारिकभोगाज्ञीकध ८
॥३२॥ र्माधर्माः।अनुभावाः पुत्रकलत्रविजयसाम्राज्याँयः॥यथा॥चेटीस्तादीहगंभोर
हरभसकरीव्यापिकाकापिकांतातल्पंचेद्वानुकल्पेप्रकटयतिमिथःकामिनी
कामनीतं।रूपंकामानुरूपंमणिमयभवनंबंधुरंबंधुरंगोलोकेलोकेशकस्य
त्वमसिनभुवनेसर्वदासर्वदाता॥२१॥नाट्याभिन्नस्थलेनिर्वेदःस्थायिभावः
शांतोपिनवमोरसः॥निर्वेदस्यपरिपोषःशांतः।दोषप्रशमोभावा।दोषाःकामक्रो
लोभा धँद्यः।अत्रविषयदोषविचारविरक्त्यादयोविभावाः।आनंदाश्रुपुलकहर्षग
द्गदवचनादयोनुभावाः॥यथा।हेयंहर्म्यमिदंनिकुंजभवनंचेयंप्रदेयंधनंपेयं
तीर्थपयोहरेर्भगवतोगेयंपदांभोरुहं।नेयंजन्मचिरायदर्भशयनेधर्मेनि ॥राम॥
धेयंमनः स्थेयंतत्रसितासितस्यसविधेध्येयंपुराणंमहः॥२२॥वेदस्याध्य ॥३३॥

यत्नं कृतं परिचितं शास्त्रं पुराणं श्रुतं सर्वं मर्थितमिदं पदं न कमलाकान्तस्य चेत्कृ
तं ॥ उत्खातस्य हृशीकृतं विरचितं से कोभसाभूयसा सर्वं निष्फलमालवाल
वलये सिक्तं न बीजं यदि ॥ ३ ॥ इति भानुविरचितायां रसतरंगिण्यां सप्तमस्तरंगः
स्थायिभावजा दृष्टिरष्टधा ॥ स्निग्धा हृष्टा दीना क्रुद्धा दृप्ता भीता जुगुप्सिता विस्मि
ता चेति ॥ व्यभिचारिभावजा दृष्टिर्विंशतिधा ॥ शून्या मलिना श्रान्ता लज्जिता शंकिता

अर्द्धमुकुलिता

मुकुलिता ग्लाना जिह्मा कुञ्चिता वितर्किता अभितप्ता विषण्णा ललिता केकरा वि
कोषा विभ्रान्ता विप्लुता त्रस्ता मदिरा चेति ॥ रसभेदादष्टधा रसदृष्टिः ॥ कान्ता हास्या
करुणा रौद्रा वीरा भयानका बीभत्साद्भुता चेति ॥ षट्त्रिंशद्दृष्टय ऊहनीयाः
कणिता विकसिता अर्द्धविकसिता चकिता सुप्ता घूर्णिता अलसा विवर्द्धिता
अर्द्धविवर्द्धिता अर्द्धवर्त्तिता नर्त्तिता अर्द्धनर्त्तिता पर्यस्ता अभ्यस्ता मिता चेति ॥

34

॥ र॰ त॰ ॥
॥ २४ ॥

ष्टिभेदाऊह्नीयाः ॥ ललिता यथा ॥ मनसिजनृपतिर्मंडनं वामदेवा शशिमुखभु
वनं यौवनं वा वनं वा ॥ अखिलमधिकृतार्थं वीचिविद्रोपखेलत्कमलविजयसी
लाशालिनालोचनेन ॥ २ ॥ ग्लानाख्या यथा ॥ पर्यस्तालकरोचिषः श्रमजुषः प्रस्विन्नगंड
स्थितः शंभोः शीकरशीतलेन शशिना वातेसमातन्वती ॥ जीयात्साम चलाधिराज
दुहितुर्निस्पंदनीलोत्पलच्छायानिद्रितपुंडरीकमिथुनस्पर्द्धासमद्दृशो ॥ २ ॥ ए
वमन्या अप्युदाहरणीया ॥ अथ रसानां जन्यजनकभावः ॥ तत्र भरतः ॥ शृंगाराद्धि
वेद्धास्यो रौद्राच्च करुणो रसः ॥ बीभत्साद्भुतोत्पत्तिः बीभत्साच्च भयानकः ॥ अय
मुत्सर्गः ॥ परेषामपि रसानां कार्यकारणभावदर्शनात् ॥ प्राचीनग्रंथकारसंम
तिरपि ॥ कथानुग्रहयोगाच्च विवक्षावशतः कवेः ॥ अन्योन्यजन्यजनकारसभा
वा भवंत्यमी ॥ यथा ॥ मातुर्दृष्टाहृणंभोरहद्युगलगलद्बाष्पधारामुरारौ नानासप

॥ राम ॥
॥ २४ ॥

ऽेस्यवक्षस्थलरुधिरचयं कुर्धाता भार्गवेयः । हस्तेन्यस्तसहस्त्रार्जुनदमनसमारं
भगंभीरवीर्यः स्फूर्जद्दोर्वल्लिहस्तो सकलकलासूत्रधारः कुठारः ॥ ३ ॥ अत्रवीरंप्र
रा तिकरणबीभत्सस्याकारता ॥ यथा ॥ कुरंगाक्ष्यावेणीसुभग विपरीतेरतिविधाव
धिस्कंधं दृष्ट्वा किमपिनिपतन्तीमरिभटः ॥ अधग्रीवं दृष्ट्वा चलकरवालव्यति
करं स्मरन्नंतः सद्यो विरमतिपरीरंभरभसा ॥ ४ ॥ अत्रभयानकं प्रति शृंगारस्य
कारणता ॥ यथा वा ॥ युधि कुपितक्रतोनंतस्यंदनास्पर्द्धिनादं दिशि दिशि रशकंठ
स्याक्रवान्वारिदास्ते ॥ तडितिजनकपुत्र्याः साम्यमालोकमानस्त्यजति न पव
नास्त्रं राघवः स्विन्नपाणिः ॥ ५ ॥ अत्रशृंगारं प्रतिवीरस्य कारणता ॥ एतेषामंगां
नो गीभावापन्नानां रससंकर इति लोका वदंति ॥ रसानां मिथो विरोधोपि ॥ तत्रभरतः
शृंगारबीभत्सरसौ तथा वीरभयानकौ ॥ रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः

३५

र.ग. वैरिरसो[वि]वैरिरसस्य भावो विभावो व्यभिचारिभावोपि रसहानिकर इति ॥ त
२५ न्नाहारयेत् । तत्र प्राचीनसम्मतिः । न च वैरिरसं ब्रूमो वैरिणं नापि भावकं ॥ न विभा
वं न संचारीभावं नैव कदाचन । किं त्वंगांगिभावापन्नयोरेकदारकदेशे सति
व्हे वैरं । देशभेदे सति न वैरं ॥ कपिसंयोगतदभावयोरिव वैरं समयभेदे सति प्र
पि न वैरं । भूतले घटतदभावयोरिव ॥ वैरं यथा ॥ प्रियेण लिंगमानायाः प्रियायाः
कुचकुंभयोः करजक्षतनिर्मुक्तरुधिरं कुसुमायते ॥ १ ॥ देशभेदे सति विरोधाभा
वो यथा ॥ एकः सिंधभुवः करे विगुलितस्नेहो द्वितीयः स्थितः कामध्वंसिनि का
लकूटकवलक्लिष्टे ततीयो धतः । भूयः क्षीरनिधेर्घनेप्रमथिते पाणिस्तुरी
यस्तनोभ्यासक्तः कमलापतेर्भगवतो नानारसाः पांतु वः ॥ १ ॥ शृंगाररौद्र राम
करुणाद्भुतरसानां विरोधाभावात् । समयभेदेन यथा ॥ भग्नं कामरिपोर्धनुः पारि २५

हतं राज्यं स्थितं कानने निर्भिन्नस्थिशिरा: खरस्यापि शितं स्पृष्टं कपिर्लीलितः
लंकेशो दलितस्थिरायरदितं लंकावधूनां श्रुतं नीतासन्नविदेहभूस्तदखिलं
रामस्य लोकोत्तरं ॥ ८ ॥ श्रृंगाराद्भुतभयानकरौद्रबीभत्सहास्यवीरकरुणाश्रृंगा
भा राणांविरोधा व: ॥ श्रृंगांगिभावपन्नानो रसानामेकत्र समावेशो यत्र स च रसः
शबल इति वेदितव्यं ॥ तस्याप्येतदेवोदाहरणं ॥ श्रृंगयोर्वैरेपि रसस्य हानिः ॥ भ न
टयोर्वैरेपि ग्रभयोरिव ॥ यथा ॥ सीतां संस्मार्यवीचिप्रचलकुवलयस्पर्द्धिचक्षुः
क्षिपंतीसेनां संवीक्ष्य रक्त:शरदलितवपुः श्रोणितासारसिक्तं ॥ रामेण क्रोध
दृप्यद्दशमुखनिपतनमुंडलाभप्रमोदक्रीडत्कालीकरालभ्रुकुटिसहचरी
संदधे चापयष्टि: ॥ ९ ॥ तत्र श्रृंगारबीभत्सयोर्वैरेपि न रसहानि: ॥ एवं मंगां
गिभावापन्नयोरविरोधिनोरेकत्र भावेपि न रसहानि: ॥ यथा ॥ भौजंगमंगिरि

१६

मयंजलदात्मकं वा शस्त्रं यदैवमुमुचेदशकंधरेण ॥ सर्वं विदेहतनया विरह
तुरेण रामेण मद्विमयमस्त्रमपि वव्यलोकि ॥१॰॥ ननु शृंगारवीभत्सयोः सहजवै
रं कुतः मद्यं निपीय निष्ठीवताः संभोगदर्शनादिति चेत् सत्यं वीभत्सस्य जु
गुप्सास्थायिभावाः सा च तद्दर्शने न तस्यास्य भवति ननु तयोः रागोत्कंठ्या
दिति ॥ ननु तथापि सति वीभत्से शृंगारो दृश्यते ॥ यथा ॥ यदपि हृदि विशाला
मुंडमाला न पाणिस्यजति न रकपालं रौरवं चर्मचैलं ॥ तदपि गिरिसुतायाः
पक्षपातः पुरारौ समुदयति विचित्रः कामिनो प्रेमबंधः ॥११॥ इत्यादाविति चे
त्सत्यं निजभर्तुरयमपि भूषणे भक्त्यातिशयेन पश्यास्तदपि जुगुप्सेव नभ
मेवव वति । जुगुप्सितत्वेन प्रतीयमानं जुगुप्सोत्पादकं । किंच । प्रियसंबंधोपाधिकं
स्तु॰ ता प्रेम तत्रोत्पद्यते । तेन भावाभावात् । वीभत्सस्तत्र न भवति ॥ ननु ॥ वीरस्य
स्थायि

॥राम॥
॥३६॥

युधिगच्छतः सर्पस्पर्शचकितता ॥ रौद्रे चाकस्मिकोत्पातानतिपाते विस्मयाः इति चेत्स
रसा० २ त्यं चकितता विस्मयश्च तत्र तत्रैव शान्तभवत्येवमतिबाविषयभेदः वीरे न प्रतिभट स्म
भु० १ द्वये किं तु जंगतः रौद्रे न प्रतिबलबलाधिक्यात् ॥ किं तूत्पातादिविस्मय इति रसवैरस्यो
त्पादिकमखिलमवधेयं ॥ तत्र पूर्वाचार्यः ॥ अन्यच्च रसवैरस्योत्पादकं वचनं यथा
नवासेरसभावतत्त्वैर्नाट्यशास्त्रविशारदैः वचनमित्युपलक्षणे ॥ एवं भावविभावा
नुभावेष्वपि द्रष्टव्यं ॥ यथा ॥ क्वाहं क्व त्वं क्व मधसमयः कुत्र वा दूतिका सा मेघच्छायाप्र
विचलमिदं कुत्र वा प्रेम यूनोः ॥ आयुर्वायुः प्रचलविशनी वारिबिंदूपमानं मानमु
ग्धे विसृज सकलं तु त्वमेव प्रतीमः ॥ २२ ॥ अत्र निर्वेदप्रतिपादकमखिलं शृंगार तत्र
विरोधि अतो चित्ते च सर्वथाप्यवधेयं ॥ अत्र प्राचीनग्रंथकारः अनौचित्यादृते ना
न्यद्रसभंगस्य कारणं ॥ प्रसिद्धौचित्यबंधस्तु रसस्योत्कर्षाय जायते ॥ २३ ॥ उद्वेगकरमतो

र॰त॰
३१

चित्तं। लोकयात्राप्रसिद्धसिद्धमौचित्यं। तस्माद्योयूनोर्यत्ररतिस्तत्रैवरसः। एकस्यैव
रतिस्त्वेन्द्रियाभासएव। क्रमेणोदाहरणानि। सीतासमागमाशाबंधःरंदशकंध
रं। प्रहर्तुंद्यमतेकामोरामोवानिशितैःशरैः।१४। अत्ररावणस्यैवरतिनतुसीतायाः
निधुवनवनशांतेयातेचलन्नयनांचलैः किमितिचलितग्रीवंमुग्धेमुहुर्मुहुरीक्ष
से। विफलमखिलंयूनोर्नोचेद्द्वयोरितिपरस्परंरतिरथमनोजन्मादेवःसएवानिषे
रति व्यते।१५। अत्रनायिकायाएवनतुनायकस्य। एवमेकस्यानेकविषयारतिर
साभासएवपरंत्वेषविशेषः। यस्याव्यवस्थिताबह्वोनायिकास्तत्ररसाभासाः। त
थासतिकृष्णस्यसकलोत्तमनायस्यबहुकामिनीविषयायारतेराभासापत्तेः। क॰
दक्षिणनायकस्याप्याभासापत्तेः। तस्मादव्यवस्थितविषयकवैशिकनायकपर
मेतत्। अतएववैशिकानांवेश्यानांचरसाभासमितिप्राचीनमतं। एकस्यानेक

राम
३१

नायिकविषयारतिर्यथा ॥ संपत्कस्याद्यतारा भवतितरलितायत्पुरोनेत्रतारा
दृष्टाकेनाद्य कांचीयदभिमुखगतौवेपतेरत्नकांची ॥ उग्रः कस्याद्यतुष्टः सखिविय
दनुगमे कस्यशृङ्गारोभिलाषस्त्वातेकेनाद्यवेणीपयसि विलुलितायत्कृतेकापि
वेणी ॥ १६ ॥ एकस्यानेक नायिकाविषयारतिर्यथा ॥ पंचेषुद्विनिपघ्नतापलहरी
श्रीतिस्तदीयापुनः कासांनस्तनकांचनाचलतटेकाश्मीरपंकायते ॥ कासांमू
र्द्धिनैकनीरजदृशांसिंदूरलेखायते कासांवानचकर्णयोः प्रियसखेमाणिक्य
भूषायते ॥ १७ ॥ यत्ररसाबहवः सरसः शबलः ॥ यत्रभावाबहवः सभावशबलः
तत्ररसशबलोदर्शितः ॥ भावशबलोयथा ॥ प्रव्रज्यैवस्तुभाग्यमेस्फुरतिपथ्यंजायेत
तस्याः वचश्चक्राग्रेममकः स्मरास्त्रिजगतीश्रन्याविनाराधया ॥ निर्मुक्तैवमनस्त्व
पासगदृशोलावण्यमन्याहृशंधिग्जन्मप्रगनास्मिकिंविलपितैः ध्यासिप्रसन्नाभव ॥ १८ ॥

॥र॰त॰॥
॥३८॥

निर्वेदौत्सुक्यामर्षभ्रममतिविषाददैन्यानांभावानांसांकर्यादेवभावशबलइ
ति॥अथरसालंकारभावानामभिव्यक्ति॥रसस्त्रिविधः।अभिमुखोविमुखोपर।
मुखश्चेति॥भावविभावानुभावैर्व्यक्तैर्यस्याभिव्यक्तिःसोभिमुखः।भावविभावा
नुभावानामनुक्तत्वात्कष्टावगमोविमुखः।परमुखोद्विविधः।अलंकाराभिमु
खोभावमुखमुखश्चेति॥अलंकाराभिमुखोअलंकारेमुख्योमनोविश्रामहेतुत्वा
द्रसोगौणः।भावमुखो।भावोमुख्योमनोविश्रामहेतुत्वाद्रसोगौणः।अत्रप्राचीं
नसंमतिः।अलंकारेचरचिरेचित्तविश्रांतिकारिणि।अलंकारस्यमुख्यत्वंगौणत्वं
रसभावयोः।अभिमुखाःस्वस्वप्रकारेणउक्ताएव।विमुखोयथा।मैथिलीलक्ष्मण।
रामःसुग्रीवःपवनात्मजः॥लंकापुरंपरित्यज्यपारंवारिनिधेर्ययौ॥१९॥संकटम
खिलमुक्तैर्यंतेसमागताःस्युरद्भुतोरसःकष्टादवगम्यते॥अलंकारमुखोयथा॥

॥राम॥
॥३८॥

रागानलैरवाभ्रमतामलीनां भांतिभ्रमातेन चकोरविस्तृः ॥ आलिंगितानाकिंतुतुषारभानोःकां
तिःकलंकस्यवपुर्विलग्ना ॥ २० ॥ अत्राद्भुतेपह्नुतेरलंकारस्यमुख्यता ॥ भावमुख्यो यथा ॥ सद्भो
भोनिधिनीरहीरपटलालंकारिणीमेदिनी ॥ दातुंविप्रकुलाययोजितवतःसंकल्पवा
क्योदयं ॥ नाभीनीररहात्स्मरोरहमुवान्नालमाविस्ततेहसांभोरुहिभार्गवस्यकिमपि
ब्रीडास्मितंपातुवः ॥ २१ ॥ अत्ररतिभावस्यमुख्यतादानवीररसोगौणः ॥ विहृहारिधराः
स्तेहंतथावर्षंतिसंततं ॥ सभतेविपुलोवृद्धिंयथारसतरंगिणी ॥ अवगाहस्ववाग्दे
विदिव्यांरसतरंगिणीं ॥ अस्मिन्पद्येनपद्येनरचयश्चातिभूषणं ॥ २२ ॥ यावज्ज्ञानोःकृता
कापिकालिंदीभुविमोदते ॥ तावत्तिष्ठतुमेभानोरेषारसतरंगिणी ॥ २३ ॥ इतिश्रीकवि
कलासनाथगणपतिनाथतनयभानुदत्तविरचितायांरसतरंगिण्यामष्टमस्तरंगः ॥ श
द्विषद्वेष्टद्वेदेतिविषमुज्ञपतेसमेविज्ञमेवाहिसेरव्यातियोजे ॥ इमामङ्कांहावभावादियुक्तां
गुरोर्दत्तनाम्नात्मजार्थमलेखि ॥ ॥ शुभमस्तुसर्वजगतांगौरीशंकरप्रसादतः ॥ श्रीराम

رس ترنگنی سمپورنہ





